Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नरपति जयचर्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ॥ॐ स्वस्ति श्रीगणेशाय नमः सरस्वत्यै नमः वासुदेवाय नमः समस्तदुरितस्तोमभेदिने विश्ववेदिने अद्वैतानंदविज्ञानम्
नये विष्णवे नमः १ केयं दन्तविपत्तवस्तस्य विधूणचन्द्रनव्रतमे मुग्धे त्वं प्रतिविंविनासि भगवत्यत्तैवलैहृदि नैनत्सारमहं
पत्तव्यमधुनाकर्णोवतंसं दधेत्वय्येसो शिवयोर्वचांसि भवतां भूयात्सुरपाद्रिदे २ कपोलदमालग्निनस्वधुन्यं भद्धदालवै
पुनानः सप्तलोकी स्यान्करी जयति शुभंभवः ३ प्रज्ञावादिविभागैर्विभजन्नीतोत्रपावपान्विप्रं गीर्भिर्गोभिल्लनामा
जयति मुनिः सामगाचार्यः ४ तदन्वये वैश्यकुलावतंसा वभूवुरभ्याः किलगोभिलीये गोत्रेजनिष्ठा श्रितविप्रदेवसाधारणाप
सहारणाद्याः ५ पुत्रोभूत्तस्य वंशस्य नृणमपिहृदयानागमध्ये मुकुंदो विज्ञानानंदकंदः स्मरइति सुधियो देवपाणाधमाहुः इच्छाप्र
ताक्षेपाणां निजगुणविभवैर्वेदमार्गस्य गोप्ता योऽष्टादेवाग्निविप्रस्तुतिमखसुधियां वेषएवं शावनेभ्यः ६ तत्पुत्रपोषववेन पूर्ण
महिमा पतेकलानान्निधिः नीरज्येमिववासुदेवचरणांभोजद्विरेफोवणी विदुषांदसेविनेष्टहरह्यस्यानता अंविदेनात्मनो वि

प.म.
१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

डुरोधे यावि दुरवत्स न्संपदामास्पदम् ७ अजनि ततो जितमायो जालपराग्यो विनीतेरणवरतयः गुणगणवृंदनिकायो य
यो धर्म्माय यस्मात् ८ सोपानान्यकलोद्धिताय यतिनां गम्भे हरिद्वारियः प्राच्यां वाच्यतिपावनेपि च कुरुते चेत्रे महद्धिर्दिनैः
रूपाणमनगगनस्त्रपरिखाः साधारणास्तेपुरे नद्धसिंहनंदस्तणेवरमयो कीर्त्यै स्वनामाग्रउरं ९ यो देवान्समनमयच्छु
ति मरवेरन्नैर्विपत्रोम्नितान्निपान्निपुसमर्पणेन सहृदः शीलेन पिराडः पिनहन् सद्धर्म्माचरणैः सनोव्रसदनैः प्रेम्णागतिपो
माधवं भनसा जालपराय एष जपाति श्री संपदामास्पदं १० आरामान्कतिपादपान्कुमलतानानारूतपन्यावनो वापीकूपसरो
सि धीकतिसुरांनाचीरवनस्यापसौ ग्रामान्वाकतिपुरपनी वृतिशुभानाचीकरन्मुक्तये सद्धिपाकृतिवामितान्कतिसुरान्ना
गुउषुज्जालपः ११ यत्कीर्तिर्हरितांपतीन्तरपतीने केकशोप्यार्द्धि चम्पारणवारपरं पणगतगानैस्तीर्थेष्यमज्जान्धिरम्
पाताले षुभुजंगदेशनधिपत्तेत्तवजेवान्तकं शीतानेवनुतिम्मदोधितिमगान्म्लाभ्याविशांजालपः १२ योदेवान्समपूज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिजपितृनातीतपञ्चकृष्याविप्रान्वेदविदःसद्रत्नवसनैर्योपृथुषड्वर्मैनः नीर्थान्पालमचीकरत्परिकरैर्दृशान्तसमापृथुरञ्जामा
रामजलाशयैर्विजयनोत्तिष्ठांचिरंजालपः १३ सर्वोस्यलोकान्कलिकालदोषाद्वर्णाश्रमाचारविकारभूतान् उद्धर्तुकामो
नियतेकभाजः समग्रहीन्कालविधानमादौ १४ शास्त्रैकधीराननमस्वविदुस्तेनैर्षकदृश्नामखवेदिनोपि मीमांसकायेपिचरा
गिरास्तेनीरागिरणावेदविंदेजसाने १५ विचार्यधर्ममविवेचनायचिंतामणिंचिंतितदंप्रयत्नात् अचीकरघात्तेकवि
ष्णुनामुख्योजालपःकलिजिनपादपेअ १६ कृतीमाध्यंदिनः श्रीमान्योगोत्रेसोपमन्यवः यतदन्तोन्मजःसंमाऽगिनचिह्नितनो
त्सुं १७ यज्वायान्येयनाचार्यपदवीकजयद्यद्रः विष्णुशर्माविधत्तेमुंयंथंविस्तंप्रसादभाक् १८ संतःसकृणावर्णनप्रसनि
नोसंतःप्रतीपःप्रियाः सद्वाचांपरिपंथिनोनचततोहृष्टाविषस्मावयं किंतुश्रीकतिपुत्रसत्यविहितंवुध्याववधार्यस्वकंकर्म एम
प्रोभितकेतवस्यहिसतोनिंदापिमोदायमे १९ यद्यप्यन्तरवद्यमद्यमदतोहंकारसारस्खलाः साधूनांहिनिसर्गएवरसचनाच २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

चरः परंज्ञात्रति नेमीजायन्तु नाम्ना चेन्मरगुणास्तोकें संतोमुदा यत्नान्यूनं यन्ति संतुमननं सत्पात्रानामपि २० ग्रंथेस्मिं
नामतो वाच्यं तत्रादौ धर्मलक्षणं प्रमाणानि च धर्मस्य तत्तत्सुबलाबलं अंगानि कर्मणां तत्र मुख्यत्वात्कालनिर्णयः तत्रादौ
वत्सरमितिः समतवश्च तत्तोखिलाः मासाः पक्षाः अहोरात्राः पिमुद्धिरनेहसः गुरुशुक्रास्तबालत्ववृद्धत्वो शेषयापाणुरेः सिंहस्थ ति
चारेपि कार्याकार्यविनिर्णयः अतस्वरूपमेदाश्च परिभाषाधिकारिणः स्त्रीणां सभर्तृकाणां यो विधिर्व्रत विधिः शुभः वृत्तसा
मान्यधर्माश्च तद्विशेषविषयो विधिः तद्वैदएकभक्तायाचितकालनिशि निर्णयः नक्षरजो दोषकूलास्त यागत्यागे निर्णयः वि
धानं चेति संक्षेपात्प्रथमोध्यानलक्षणे उद्यानेषु च सर्वेषु व्रतेषु क्रमशो पुनः सुखस्मार्यमनुकीर्तं नात्र विद्वद्वरैः स्वयं ज्ञेयं तत्र
ग्रहो नास्ति दुरूहं तच्च धीमता ॥ ॥ इति ग्रंथोपक्रमानुक्रमः ॥ ॥ अथ धर्मस्वरूपनिरूपणं तत्र मनुः विद्वद्भिः सेवि
तः सद्भिर्नित्यमद्वेषरागिभिः हृदयेनाभ्यनुज्ञातो यो धर्मस्तन्निबोधतेति विद्वद्भिर्वेदार्थविद्भिः सेवितः सततमनुष्ठितः सद्भिः

संक्रान्तिनिर्णयः सर्वोग्रहणस्य चन्द्रस्तराः ततोऽधिमासस्तत्रादिकार्याकार्यविनिर्णयः ४

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰चिं
३

साधुभिः क्षीणदोषैरित्यावत्। नित्यं अनिंदात्वप्रमत्तया सर्वकालं अद्वेषरागिभिः विध्वत्रनुमतः रागद्वेषशून्यैः अतो धर्म्मपक्षपातायाधर्मचारिषु वेदविरुद्धधर्मचारिषु द्वेषो विनाधर्मीय हृदयेनाभ्यनुज्ञातः निर्विचिकित्सकर्तव्यत्वेनानुमतः अत एवाह विश्वामित्रः यमार्याः क्रियमाणं हि शंसंत्यागमवेदिनः स धर्मो यं विगर्हन्ते तमधर्मं प्रचक्षत इति आपस्तंबोपि न धर्माधर्मौ चरत आवां स्व इति न देवा गंधर्वा न पितर इत्याचक्षतेयं धर्मोयमधर्म इति यं त्वार्याः क्रियमाणं प्रशंसंति स धर्मो यं विगर्हंति सोधर्म इति अयमर्थः सर्वलोकप्रत्यक्षतामात्मनिवेदनाय धर्माधर्मौ इति ब्रुवाणौ न भ्रमतः आवां वर्ताव है इति नापि देवादयस्तं विदुः आर्या वेदविद्वांस एव तं जानंति यत्क्रियमाणमात्मा परितुष्यति यच्च न गोप्यं महाजनेनं तं धर्ममाचक्षत इति केचित् भविष्यत्पुराणे धर्मः श्रेयः समुद्दिष्टं श्रेयोभ्युदयकारणमिति श्रेयः साधनत्वाद्धेय इति ॥ ॥इति सामान्यतो एम
धर्मनिरूपणं अथ धर्मविशेषाः तत्र हारीतः अथाश्रमिणां एष धर्मो विशेषधर्मः समानधर्मः कृत्स्नधर्मश्चेति पृथग्ध ३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

साधारणधर्मः २

मौवर्णधर्मः आश्रमेभ्यः पृथगनुष्ठानात् यथा नित्यं मद्यपानवर्ज्जनादि इति विशेषधर्मः आश्रमधर्मः आश्रमविशेषैरनुष्ठी
यमानत्वात् यथा ब्रह्मचारिणो भिक्षाचरणाग्निपरिचरणादि समानधर्मः अहिंसासत्यवदनादीनि कृत्स्नधर्मः एतद्व्यतिरिक्तः सक
लोधर्मः गोबलीवर्दन्यायेन तस्मिन्नेव गुणधर्मनिमित्तधर्मावन्तर्भवतः केचिदाहुः कृत्स्नोऽपि धर्मो द्विविधो भवति अनुमायि पा ३
को नैष्ठिकश्चेति अनुमायित्वं नैतद्धर्माश्रमधर्मस्तत्त्लोकप्राप्तिकामवत्ता तत्संबंधी भवतीसोऽनुमायिकः नैष्ठिकस्तु निष्ठा
संसारसमाप्तिस्तत्संबंधी तत्प्रयोजनत्वात् इति भावः आत्मत्राणवतः प्रत्यवायपरिहाराय नित्यनैमित्तिकधर्मानुष्ठानं फलान
भिसंधानेन काम्यकर्मानुष्ठानेच भविष्यपुराणे सत्तु पंचविधः प्रोक्तो वेदमूलः सनातनः यथा वर्णधर्मः स्मृतस्त्वेक आश्रमा
णामतः परः वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा वर्णत्वमेकमाश्रित्य अधिकारः प्रवर्तते स खल्वाश्रमधर्मस्तु भि
न्नाः दंडादिका यथा वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्तते स वर्णाश्रमधर्मस्तु मौंजी मेखला यथा यो गुणेन प्रवर्त्तेत गुण

योधर्मस्तं प्रवर्त्तते। द्वि २

योधर्मस्तं प्रवर्त्तते। वर्णधर्मस्त उक्तास्तु यथोपनयनं नृपः यस्त्वाश्रमं समाश्रित्य २

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि०चिं धर्मः स उच्यते यथा मूर्द्धाभिषिक्तः स्वप्रजानां परिपालनं निमित्तमेकस्मान्नित्यो धर्मः संप्रवर्त्तते नैमित्तिकः स विज्ञेयः प्राय
४ श्चित्तविधिर्यथा अधिकारोऽत्र धर्मः तत्र साधारणो धर्मो नोपन्यस्तः प्रसिद्धत्वात् तत्रापि भेदः कालिकाउक्तः इष्टापूर्त्तौ स्मृतौ ध
र्मौ दिव्यकौ शिष्टसंमतौ प्रतिष्ठार्थं तयोः पूर्वमिष्टं यत्नादिलक्षणं मुक्तिमुक्तिप्रदं पूर्त्तमिष्टं भोगार्थसाधनं प्रतिष्ठार्थं देवप्रति
ष्ठा जलाशयोत्सर्गादि तयोः इष्टापूर्त्तयोः लक्षणमाह स्मारेन एकाग्निकर्महवनं त्रेतायां पच्च हूयते अन्तर्वेद्यां च यद्दान
मिष्टं तदभिधीयते वापीकूपतडागानि देवतायतनानि च अन्नप्रदानमारामाः पूर्त्तमर्थ्याः प्रचक्षते इति एकस्मिन्नग्नौ आवसथ्याख्ये यद्वि
यते हवनं तदेकाग्निकर्महवनं त्रेतायां अग्नित्रये विशेषधर्मानाह मनुः अध्यापनमध्ययनं यजनं याजनं तथा दानं प्रतिग्रहं चैव
ब्राह्मणानामकल्पयत् प्रजानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत् पशूनां रक्षणं दान राम
मिज्याध्ययनमेव च वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च एकमेव तु शूद्रस्य प्रभुः कर्म समाचरेत् एतेषामेव वर्णानां शुश्रू ४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

सामनस्यपयेति विषयेष्वप्रसक्तिः इंद्रियविजयः वणिक्पथं वाणिज्यं। कुसीदं वृध्यर्थं धनप्रयोगः। धर्मास्तु महाभारते ब्राह्म
णक्षत्रियविशां शूद्राणां च परंतप कर्माणि च विभक्तानि स्वभावप्रभवैर्गुणैः शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ज्ञानं विज्ञा
नमास्तिक्यं ब्रह्मकर्म स्वभावजं विज्ञानं यज्ञादिकर्मादिकौशलं शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षा
त्रं कर्म स्वभावजं शौर्यं विक्रमशीलत्वं तेजः अधृष्यत्वापादको गुणविशेषः दाक्ष्यमुत्साहः ईश्वरभावः प्रभुत्वं कृषिगोरक्षवाणिज्यं
वैश्यकर्म स्वभावजं गोरक्षं पशुपाल्यं परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः इति तथा
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः स्वधर्मः स्ववर्णाश्रमधर्मः तथा अनृशंस्यमहिं
सा चाप्रमादः संविभागिता यथाचाभिनिवेशेवच सत्यमक्रोधमेव च स्वेषु दारेषु संतोषः शौचं नित्यानसूयता आत्मज्ञानं तिति
क्षा च धर्मः साधारणो नृप आनृशंस्यमक्रूरत्वं आत्मज्ञानं नित्यात्मज्ञानं तितिक्षा क्षमा विष्णुः क्षमा सत्यं दमः शौचं दानमिंद्रि

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यनिग्रहः अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं अनभ्यसूया च तथा धर्मः सा
मान्य उच्यते सामान्यः चतुर्णामपि वर्णानां समानः बृहस्पतिः दया क्षमानसूया च शौचानायासमंगलं अकार्पण्यमस्पृहत्वं
सर्वसाधारणानि चेति महाभारते सत्यं दमस्तपः शौचं संतोषो ह्रीः क्षमार्जवं ज्ञानं शमो दया ध्यानमेष धर्मः सनातनः देवलः
शौचं दानं तपः श्रद्धा गुरुसेवा क्षमा दया विज्ञानं विनयः सत्यमिति धर्मसमुच्चयः याज्ञवल्क्यः इज्याचारदमाहिंसादानस्वा
ध्यायकर्मणाम् अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति तथा अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः दानं दमो दया क्षांतिः
सर्वेषां धर्मसाधनमिति दानं बृहस्पतिः परे वा बंधुवर्गे वा मित्रे द्वेष्टरि वा सदा आपन्ने रक्षितव्यं हि दयैषा परिकीर्तिता न
गुणान्गुणिनो हंति स्तौति मंदगुणानपि नान्यदोषेषु रमते सानसूया प्रकीर्तिता शरीरं पीड्यते येन सुशुभेनापि कर्मणा अत्यं
तं तन्न कर्तव्यमनायासः स उच्यते प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनं एतद्धि मंगलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः स्तोकादपि

बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् न कुप्यति न वा हन्ति

अभक्ष्यपरि
असंसर्गश्चाप्य
भिः। स्वधर्मे व
नं शौचमेतत्प्र
तम् २

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रदातव्यमदीनेनान्तरात्मना अहन्यहनि यत्किंचिदकार्पण्यं संप्रहितमुच्यतमिति यथोत्पन्नेन संतोषः कर्तव्यो ह्यर्थवस्तुना
परस्याचिंतयित्वार्थं सा स्पृहा परिकीर्तितेति भारतेपि सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः तपः स्वधर्मवर्तित्वं शौचं संक
रवर्जनं संतोषो विषयत्यागो ह्रीरकार्यनिवर्तनं क्षमा द्वंद्वसहिष्णुत्वमार्जवं समचित्तता ज्ञानं तत्त्वार्थसंबोधः शमश्चित्त
प्रशांतता दयाभूतहितैषित्वं ध्यानं निर्विषयं मनः व्रतोपवासनियमैः शरीरोत्तापनं तप इति तथा प्रत्ययो धर्मकार्येषु तथा
श्रद्धेत्युदाहृता नास्ति ह्यश्रद्दधानस्य धर्मकृत्यप्रयोजनं प्रत्ययो यथार्थबुद्धिः अत एव कालिकापुराणे कायक्लेशैर्न बहुभि
र्न चैवार्थस्य राशिभिः धर्मः संप्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि देवलः विगर्हातिक्रमाक्षेपहिंसाबंधवधात्मनां अन्यम
न्युसमुत्थानां दोषाणां मर्षणं क्षमा स्वदुःखेष्विव कारुण्यं परदुःखेषु सौहृदात् दयेति मनुजाः प्राहुरनुक्रोशं च जंतुषु यत्तु
न लौकिकीनां च वैदिकीनां च सर्वशः धारणं सर्वविद्यानां विज्ञानमिति कीर्तितं विनयं द्विविधं प्राहुः प्रश्रयं च दमनाविति

कौ १ … र्थ०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि. वि. शरीरोपरतिः शांतिस्तां नु प्रत्ताप्रसादमिति किंच केवलः श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्य्यताम् आत्मनः प्रतिकूला
६ नि परेषां न समाचरेत् तथापि प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति इतोपि यथैवा
त्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता सुखदुःखानि तुल्यानि यथात्मनि तथा परे इति अथ स्वधर्माचरणफलं तत्र मनुः श्रुति
चौहि ४ स्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखमिति यस्य कर्मणः फलमुक्तं न देवाजितविशिष्टं
फलं लभते तदेवानुत्तमं तत्रापि विशेषो गौतमेनोक्तः वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण वि
शिष्टदेहदेशजातिकुलरूपायुःश्रुतचित्तसुखमेधसो जन्म प्रतिपद्यंते विष्वंचो विपरीता नश्यंति ततः शेषेणेति तस्यैव कर्म
णः शेषेणेति भर्तृयज्ञः तस्मादन्यच्छेषः तेन कर्मणेति भट्टपादाः अत एव तत्राहुः गौतमीयेपि तच्छेषस्तस्माद्धित्राधवे रम
दावेति मेधावीयमिति लक्ष्मीधरः विष्वंचः सर्वतोगामिनः स्वच्छंदचारिणः विपरीता नश्यंति नरकादौ पापफलमनुभूय ६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नश्यंति विप्रकृष्टदेशादौ जन्म प्रतिपाद्य पापरता भवंतीत्यभिप्रायः आपस्तंबः सर्ववर्णानां स्वधर्मानुष्ठाने परिमितं सुखं ततः
परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रपद्यंते तच्चक्रवदुभयोर्लोकयोः सुख एव प्र ठा
वर्तन्ते यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषेण फलपरिवृद्धिरनंता परंस्त्रेहं अपरिमितं चिरकालानुवृत्ति परिवृत्तिः
पुनरावृत्तिः कर्मफलशेषेण फलसाधनशेषेणास्यैः एतच्चानित्यानामपि कर्मणान्त्रियमफलमिति कपर्दिभाष्यं ननु तस्मा
त्सुख एव प्रवर्ततेन दुःखे यथा सम्यक्कृष्टे क्षेत्रे उप्तस्य बीजस्य फलवृद्धिरनंता सर्वतः परिणामरसवीर्यादिवृद्धिः तथा आवश्य
कवर्णाश्रमोक्तधर्मानुष्ठानेरि विष्णुपुराणेपि वर्णाश्रमाचारवता पुरुषेण परः पुमान् विष्णुराराध्यते पंथा नान्यत्तत्तोषकारण
मिति मनुरपि आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः आचाराद्धनमक्षय्यं आचारो हंत्यलक्षणमिति आचारेत्रावश्यक
कर्मानुष्ठानं अस्तेयं अतिभूतं अलत्तरां अशुभस्वर्कदेहचिन्हं स्कंधारोतिलकादि नेत्रचिन्तमधर्म्ममनारब्धभोगं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.वि. हंतीत्यर्थः तथा च मनुवशिष्ठयमाः सर्वलक्षणहीनोपि समुदाचारवान्नरः श्रद्दधानोनसूयश्च शतं वर्षाणि जीवति हारीतः
८ आचारः परमो धर्म इति वेदविदो विदुः तस्मादाचारिणो लोकाः प्रवदंति मनीषिण इति तथा काम्यैश्चैव यज्ञदानैस्तपोभिर्लब्ध्वा
मेर्मुक्ता ३ लोकान्पुनरपयांति जन्म काम्यैर्युक्ताः सत्यपराः सदंगास्तपोनिष्ठाव्रततयान्यांति लोकान् एतेन कामनासद्भावनिबंधनः फल
भेदो विदर्शितः भविष्यपुराणे फलं विनाप्यनुष्ठानं नित्यानामिष्यते स्फुटं काम्यानां स्वफलार्थं तु दोषघातार्थमेव तु नैमित्तिकानां
तु करणं त्रिविधं कर्मणो फलं तथैके चित्तदुपात्तस्य दुरितस्य प्रच्युतमे अनुत्पत्तिस्तथा चान्ये प्रत्यवायस्य मन्वते नित्यक्रियां तथा
चान्ये अनुषंगफलां श्रुतिः बृहस्पतिः बृहस्पतिः श्रुतिस्मृती चक्षुषी द्वे द्विजानां न्यायवर्त्मनि मार्गमुज्झंति तद्धीनाः प्रतपेतिप
थस्मृताः न्यायार्थे धर्म इति भावः अथानाचारिणां निंदा तत्र मनुर्वसिष्ठो दुराचारो हि पुरुषो लोके भवति निंदितः दुःखभागी रम
च सततं व्याधितोल्पायुरेव च दुराचारो निंदिताचारः स च द्विविधः निषिद्धाचरणरूपो निर्मलाचरणरूपश्चेति तथापस्त ८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

षः यत्त्वनुप्रीत्युपलब्ध्यर्थः प्रवृत्तिर्न तत्र शास्त्रमस्तीति तदनुवर्तमानो नरकाय राध्यति यत्र कर्मणि प्रीत्युपलब्ध्यर्थ इति लौ
किकप्रमाणात् प्रीतिसाधनतत्वज्ञानात्प्रवर्तते न तत्र शास्त्रं व्यापार नरकाय राध्यति नरकवशो भवति राध्यतेर्वशगमनमिति
निरुक्तवचनात् अंगिरास्तु स्वाभिप्रायकृतं कर्म यत्किंचिद्ज्ञानवर्जितं क्रीडाकर्मेव बालानां तत्सर्वं निःप्रयोजनं ज्ञानवर्जि
तं शास्त्रीयज्ञानवर्जितं आपस्तंबः नेमं लौकिकमर्थं पुरस्कृत्य धर्मांश्चरेत् निष्फला ह्यभ्युदये भवन्ति इमं लौकिकमर्थं ध
नकीर्त्यादि पुरस्कृत्य उद्दिश्य अभ्युदये शास्त्रीयफलविषये मनुः तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः धर्मेण तु स
हायेन तमस्तरति दुस्तरं तमः पापं तथा सीरत्नपि हि धर्मेण मनो धर्मे निवेशयेत् अधार्मिकाणां पापानां माभूद्वरणं वि
पर्ययमिति अधार्मिकाणां विहितमकुर्वतां पापानां प्रतिषिद्धसेविनां महाभारते यस्तूत्क्रामति मतिं देहे मार्गानुसा
रिणो तमाहुः गुणकर्माणमशोच्यं मित्रबांधवैः सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभं तथात्मानं समादध्याद्भ्रंशे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.विं ८ नयपापुनः धर्मोपयेभ्यस्त्यजंतिबुद्धिमोहाद्विजानतः अपथागच्छतांतेषामनुयातानाविनश्यति इदंचत्वामत्रपुनर्ब्रवी
मि पुण्यपदंतातमहाविशिष्टं नजातुकामान्नभयान्नलोभाद्धर्मंजह्याज्जीवितस्यापिहेतोः अत्रार्थेतैत्तिरीयकश्रुतिः
धर्मो विश्वस्यजगतःप्रतिष्ठालोके धर्मिष्ठंप्रजाउपसर्पंति धर्मेणपापमपनुदंति धर्मेसर्वंप्रतिष्ठितं तस्माद्धर्मंप
रमंवदंति मनुभारते धर्मएवहतोहंति धर्मोरक्षतिरक्षितः तस्माद्धर्मोनहंतव्योमनोधर्मोहतोवधीदिति इत्यादि
नानाश्रुतिस्मृतिवचननिचयपर्यालोचनयास्ववर्णाश्रमाचाररूपोधर्मएवचतुर्विधपुरुषार्थसाधनंनान्यत् अथ
धर्मेप्रमाणं तत्रमनुः वेदोऽखिलोधर्ममूलंस्मृतिशीलेचतद्विदां आचारश्चैवसाधूनामात्मनस्तुष्टिरेवचेति अ
खिलोवेदोधर्ममूलं योयंविधिविधेयतर्कभेदैस्त्रिविधोपिवेदः सकलोपिविधिनिषेधात्मकोपिधर्ममूलं धर्मोत्प एम
त्तौनिकारणं तद्विदांवेदविदांमन्वादीनांचयेस्मृतिशीले स्मृतिधर्मसंहिता शीलंचसदाचारः तेअपिधर्ममूलम् ८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वेदविदामेवस्मृतिशीलेधर्ममूलमितिवदतातयोरपिवेदमूलयोरेवधर्ममूलत्वमभ्युपगतं धर्मश्चअजहत्स्वार्थलक्षण
याधर्मादिपरएव नचश्येनयागाद्याभिचारिकप्रतिपादकवेदभागस्याधर्ममूलताशंकनीया उत्पत्तौतस्यापिधर्ममूलत्वात्ना ब्रह्मयज्ञादौतस्याप्युपयोगात् २
पिबृहस्पत्यादिप्रणीतानामर्थशास्त्ररूपाणांधर्मत्वप्रसक्तिः तासामर्थशास्त्ररूपाणांवेदमूलत्वाभावात् एतेनवामागमा
अपिपरास्ताः शीलमद्रोहादि तदपिवेदविदामेव अतस्त्वावैदिकबाह्यानांशीलंनवेदमूलं शीलस्वरूपंमहाभारते अद्रोहःस
र्वभूतानांकर्मणामनसागिरा अनुग्रहश्चदानंचशीलमेतद्विदुर्बुधाइति हारीतोपि ब्रह्मण्यतादेवपितृभक्तता सौम्यताऽप
रोपतापिता अनसूयतामृदुता अपारुष्यंमित्रताप्रियवादित्वंकृतज्ञताशरण्यताप्रशांतिश्चेतित्रयोदशविधंशीलं एतस्या
पिवेदविदामेवप्रामाण्यमाचारोवेदवा आचारोविवाहादौकंकणबंधनाद्यनुष्ठानं आत्मनस्तुष्टिस्तत्रधर्मत्वसंदेहेसतिवैदि
कसंस्कारवासितांतःकरणानामेकस्मिन्पक्षेमनःसंतोषः तुल्यविकल्पस्थानेत्वात्मतुष्टिरेवधर्ममूलमितिविज्ञानेश्वरः

निं.विं. ९

ननधी(

महद्पापात् अपि एतेन वैदिकानां तंत्रधर्मे धीसंस्कृतात्मनां आत्मतुष्टेः प्रमाणत्वं सिद्धं धर्मत्वसिद्धय इति याज्ञवल्क्यश्च श्रु-
तिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतं इति श्रुतिर्वेदः स्मृतिर्धर्मसं-
हिता सदाचार उक्तः स्वस्यात्मीयस्यात्मनो मनसः प्रियं केचिदन्यथा योजयंति स्वस्य प्रियं आत्मनः सम्यक्संकल्पजः कामो
धर्ममूलं न परस्य स च शास्त्राविरुद्ध एव यथा भोजनव्यतिरेकेणान्न (मया) जलं पातव्यमिति अथवा सम्यक्संकल्पजः काम इति सं-
म्यक्संकल्पो मननं तच्चात्मश्रवणानंतरं मुमुक्षुभिः क्रियते तस्माज्जातो यः कामो ब्रह्मण्यभिलाषविशेषः धर्मवेदिभिरपि
नानाविरुद्धवाक्यश्रवणसमनंतरं सम्यक् कृपा रागादिरहितेन मननाज्जातो यः कामो धर्माभिलाषः सोपि धर्ममूलं एतेषां
विरोधे पूर्वस्य पूर्वस्य बलीयस्त्वं श्रुतिविप्रकर्षात् मनुरपि वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः एतच्चतुर्विधं प्राहुः साक्षाद्ध- एम ९
र्मस्य लक्षणमिति तथा यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः स सर्वोभिहितो वेदे सर्वज्ञानमयो हि सः सर्वं तु समवेक्ष्येदं निखि-

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लंज्ञानचक्षुषा श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेतवै तथा श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ते सर्वार्थे
स्मेर ष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः स साधुभिर्बहिष्कार्यो नास्तिको वेदनिंदक इति सर्वा
र्थेषु सर्वपुरुषार्थप्रतिपादकवाक्येषु अमीमांस्ये हेतुप्रदर्शनेन अविचारणीये इति न विचारस्य तु सर्वेचोचितत्वात् अत एव
पश्चयाकुरुते वाचं पश्चमीमांसते ह्वरं तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनावित्यर्थवादः इति न विचारस्यैव निंदार्थवादेऽपि
हैतुकस्यैव यथा तदप्रामाण्यमनृतव्याघातपुनरुक्तेभ्य इत्यादिहेतुभिर्वेदाप्रामाण्यारोप इत्यादि ननु वेदस्मृतिः सदाचारः
स्वस्य च प्रियमात्मन इति प्रमाणचातुर्विध्यमनुपपन्नं स्मृतिसदाचारयोरपि वेदमूलयोरेव प्रामाण्यात् सत्यं परमार्थतस्तु श्रु
तिरेव धर्मे प्रमाणं स्मृत्यादीनां सन्निकृष्टविप्रकृष्टत्वेन बलीयस्त्वज्ञापनाय स्मृतिसदाचारादीनां निंदकस्यापि वेदनिंदातोषज्ञा
पनाय च पङ्क्तिदेशः स्त्रीसैद्वारणमपि श्रुतिविचारानधिकरणो धर्मज्ञापनोपायदर्शनाय वाचारस्यापि पङ्क्तिरूपणम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत एव मन्वादिभिः स्मृतयोऽत्र निबद्धाः अनाचारः सद्भिन्नशिष्टाचारपरंपरैकदेश एवेति तेनैतन्निरस्तं संप्रत्यंतकल्पजः
कामः सदाचारविरुद्धो धर्ममूलं आचारोपि स्मृत्यविरुद्ध एव अतो मातुलकन्यापरिणयनादेर्देशांतरे परंपरागतस्यापि न
धर्ममूलत्वं स्मृतिविरोधात् सपिण्डकन्यापरिणयने प्रायश्चित्तविधानात् स्मृतिरपि स्वशाखाश्रुत्यविरुद्धैव धर्ममूलं पर
शाखीयनिषेधात् उक्तं च छन्दोगपरिशिष्टे आद्यात्रिविधा प्रोक्ता विद्वद्भिर्धर्मकारिणां आद्या च परोक्ता च तृतीया चा
यथाक्रियेति मनुरपि चतुर्विधं प्रयोजनमाह अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते धर्मं जिज्ञासमानानां प्रमाणं परमं श्रु
तिरिति अनेन चातुर्विध्यनिरूपणेन किं क्रियत इत्याह अर्थाज्ञेनैरतो वान्यपराणां धर्मज्ञानं विधीयते मन्वादयोपि अ
र्थकामेष्वसक्ताः स्मृतिश्रवणोच्चारणविचारणाधिकारिणः सदाचारादेव धर्मं जानीयुरिति येन्वेवाधिकारिणो धर्मजि
ज्ञासमानास्तेषां परमं प्रमाणं श्रुतिरेव परमत्वं चास्याः सर्वप्रमाणप्राबल्यात् तत्रापि विरोधे प्रकारमाह मनुः श्रुतिद्वैधं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः उदितेनुदिते चैव समयाध्युषिते तथा सर्वथा
वर्त्तते यत्त इतीयं वैदिकी श्रुतिरिति श्रुतिद्वैधे द्वावपि धर्मौ एतौ एतस्यानियतत्वेनानियमप्रसंगः अतो निंदके दोषोपि तोपि वेदव्या
घातदोषोपि परिहृतो भवति अतः परस्परं निंदार्थवादोपि न दोषाय य उदिते जुहोति श्यामोवास्याहुतिमभ्यवहरति योनुदि
ते जुहोति शबलोवास्याहुतिमभ्यवहरति योनुदितानुदिते जुहोति श्यामशबलौ वास्याहुतिमभ्यवहरत इति तेष्वन्यतरहोम
निंदयान्यतरस्तुतिपरा इति न व्याघातः तथा च जैमिनसूत्रं नहि निंदा केवलं निषिद्धं निंदयितुं प्रवर्त्तते ऽपि तर्हि निंद्यादितरं स्तो
तुमिति तस्मादुदितहोमस्तुत्यै अनुदितहोमनिंदा सा च विधिसंस्पर्शा भवति तथोक्तं भट्टपादैः अर्थेन तु विधिसंस्पर्शो निषे
धो नार्थवान्भवेत् इति अतः षोडशीग्रहणाग्रहणयोर्विकल्पः अन्यथा अन्यतरश्रुतेः परित्यागो दोषः प्रसज्येत याज्ञवल्क्यः
पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति पुराणादीनि चतुर्दशविद्यास्था

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰चि॰ नानि विद्यानां पुरुषार्थसाधनानां धर्मस्य च स्थानानि व्यवस्थापकत्वेन यं यं क्रतुमधीयीत तस्य तस्याप्नुयात्फलमित्यादिवचने
११ भ्यः पुराणादिमिश्रिता वेदा विद्यानां धर्मस्य च स्थानानीत्येवं वक्ता वेदानां मुख्यत्वं प्रदर्शितं पुराणादीनां वेदार्थोपबृंहणेन विद्या
त्वं इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेदिति बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यतीति मनुवचनात् न्यायमीमांसयोस्तु वेदप्रा
माण्यवाक्यविचारद्वारा धर्मशास्त्रस्य तदध्ययनेन यमोबोधनेन मुख्यत्वं च वर्णसंस्कारेण चात्र अनुपयोगिकत्वं अङ्गानां तदर्था
वबोधकत्वेनेति संक्षेपः विष्णुपुराणे अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव ता इति तत्र चतुर्दश धर्मप्रमितिं प्रतिस्थानानि
चत्वारस्तु दशार्थाः कश्चिल्लौकिकमर्थप्रमाणं पंचमो धर्मेऽपि प्रमाणमिति समन्तः वेदवेदाङ्गेतिहासपुराणतर्कमीमांसाधर्मशा एम
स्त्राणि कुलगणदेशजातिवर्णधर्मपाषण्डाश्रमगोत्रियधर्मव्यवस्थापकानि प्रवर्तकानि तत्राद्यो धर्मशब्दो वर्णपर्यायैः प्रत्येक ११

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

मभिसंबध्यते कुलधर्मः चूडाकरणकालादिः विवाहश्मशानयोरपि सदाचारांतरभोजनादिनियमः गणधर्मास्तद्देशधर्माः
मतिवर्णी वाससोधारणविन्यासविशेषादयः जातिधर्माः सूतादीनामश्वसारथ्यादयः वर्णधर्मा उपनयनादयः पारस्कराद्या वेदशाखाः
आश्रमधर्मा भिक्षादंडादयः श्रोत्रियाश्छंदोध्यायी तद्धर्माः वेदानुवाकसूक्ताध्ययने व्रतरूपाः यथाकारीर्यध्ययने भूमिभोजनं
नापिकेन सौपर्णादिव्रतानि चेति पाखंडस्तानं च हेयत्वेन वेदस्वरूपमाह पारस्करः विधिर्विधेयस्तर्कश्च वेद इति विधिर्वाक्यं
विधेयो मंत्रः तर्कोऽर्थवाद इति अर्थवादानां हि अनिष्टअनिष्टप्रसंजकत्वेन तर्कत्वं यथा काः एकैकाउपदधानो संजनीयद्रव्यसंदेहे
तेजो वै घृतमित्यादिनिर्थवादाद्देवघृतानामत्वमवसीयते यदि घृतानाभाशर्करा न स्युर्घृतार्थवादो न स्यात् भवति च तस्माद्घृतानामो
इति केचित्तर्कशब्देन मीमांसान्यायशास्त्रे इति व्याचक्रुः तदुपेक्षणीयाः वेदशरीरेऽतर्दंतर्मीमांसायोगात् शंखलिखितौ स्मृतिधर्म
शास्त्राणि तेषां श्रवणेनात्मनो मनुविभ्रुयमदत्तांगिरोत्रिवृहस्पत्युशन आपस्तंबवशिष्ठकात्यायनपराशरव्याससंखलिखितसंव

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.चिं. १२ तेगौतमशातातपहारीतयाज्ञवल्क्यप्रचेतसादयः यमः मनुर्यमोवसिष्ठोत्रिर्दक्षोविष्णुस्तथांगिराः उशनावाक्पतिर्व्यासःआप
स्तंबोथगौतमः कात्यायनोनारदश्चयाज्ञवल्क्यःपराशरः संवर्तश्चैवशंखश्चहारीतोलिखितस्तथा एतैर्यानिप्रणीतानिधर्मशा
स्त्राणिवैपुरा। तान्योवानिप्रमाणानितर्कहेतुभिः तथाशंखसत्तापव्यादिशंखपात्राश्चैवबुधदेवलसोमजमदग्निप्रजा
पतिविश्वामित्रवृद्धशातातपपैठीनसिपितामहबौधायनछागलेयजाबालच्यवनमरीचिकश्यपाः याज्ञवल्क्योपि मनत्रिविष्णु
हारीतयाज्ञवल्क्योशनोंगिराः यमापस्तंबसंवर्ताःकात्यायनबृहस्पती पराशरव्यासशंखलिखिता दक्षगौतमौ शातातपोव
सिष्ठश्चधर्मशास्त्रप्रयोजकाःइति उपप्रदर्शनमेतत् अतोमरीचिशांशपायनमार्कंडेयकाश्यपजिनिमत्तीनामपिधर्मशास्त्रप्र
योजकत्वंइतिनचविंशसंख्यापुराणानामेतदनुवादकत्वेनप्रमाणं नस्यात्तेषां तथाचभविष्यपुराणे अष्टादशपुराणेषुयानिवा रम
क्यानिपुत्रक तान्यालोच्यमहाबाहोतथास्मृत्यंतरेषुच मन्वादिस्मृतयोयास्तुषट्त्रिंशत्परिकीर्तिताः तासांवाक्यानिक्रमशः १२

त्वात्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समालोच्य ब्रवीमीति इतीश्वरवाक्येन मन्वादिषड्विंशत्परिकीर्तिताः नाम्नानन्तरोक्ताभिरेव परिपूर्यन्ते ननु वृद्धमनुमनुबृहत्परा
शरहारीतलघुहारीतादिभेदैः संख्याधिक्यमेकवक्तृकत्वेन संख्याया अभेदात् अवस्थाभेदेनैव संख्याभेदः अतस्तेषां न भेद
इति अत एव याज्ञवल्क्येनोक्तं योगशास्त्रं च मत्प्रोक्तमिति तथा स्नानमध्येऽवनेमैत्रेयं त्वयोक्तं पुराणं चेति एतेषां परस्परं वा लाघव
परिच्छेदो गृह्यतन्त्रपरिशिष्टेभ्यः तथा चन्द्रोदयपरिशिष्टे बहूनां वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितं तस्य तावति शास्त्रार्थे कृते
सर्वः कृतो भवेदिति गृह्यशब्दः सूत्रमात्रोपलक्षणः अत एव तत्र स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः कर्तुमिच्छति दुर्मे
धाः मोघं तस्य विचेष्टितं यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति अतः सर्वशा
खाप्रत्ययमेकं कर्मेति न्यायेन स्वशाखोक्ताविरुद्धधर्मत्वेन सर्वेषां सर्वोपयोगः तत्र स्वनिश्रितशाखामूलत्वात् स्मृतीनां तदर्थ
साम्येन परत्वापर्यवसानात् । एवं पुराणामपि तत्र शाखापरत्वं कल्प्यं अत्र केचिदाहुः पुराणं हि सर्ववर्णसाधारणं सर्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि॰ विं॰ णाखिलाचारणाम् पुराणश्रवणेऽस्त्रीशूद्राणामप्यधिकारात् तदेतत्प्रलपितमात्रं तेषामनुवादकत्वात् अन्यथाहोला
१३ धिकरणानुदयप्रसंगात् नत्र हि पुराणप्रसिद्धत्वमप्याचारमूलत्वांगीकरणात् अपि च श्रवणाधिकारे पाठेप्यधिक्रियत इ
ति वचनाभावात् अनुपनीतद्विजस्त्रीणां श्रवणाधिकारेपि पाठानधिकारात् नातिथ्यादरश्यो मूलस्वधानिनयनादतै
शूद्रेण हि समस्तावद्यावद्वेदेन जायत इति मनुवचनात् स्त्रीशूद्राणां पुराणोच्चारनिषेधाच्च अत एव पुराणमधिकृत्य भविष्य
पुराणे अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचनेति तस्माच्छूद्रैर्विप्रान्मुखात् श्रोतव्यं । वि
प्रेषु श्रवणन्तु मुमुक्षादिव्याजेन श्रोतव्यं क्वचित् देवार्चापुरतः कृत्वा ब्राह्मणानपि धर्मतः स शूद्रः शुद्धपापादिति संक्षेपतः उक्तं वि
स्तारभिया विलोमजातीनां तत्राप्यनधिकारः तेष्वपि सूतस्य निषादस्थपतीति न्यायेन वाचनिकः पुराणप्रवचनाधिकारः सा
मर्थ्यात्तदध्ययनमप्यास्तीयति वायुपुराणे धर्म एष हि सूतस्य सद्भिर्दिष्टः पुरातनैः देवतानामृषीणां च राज्ञाममिततेजसां वैश्य

कदाचनेति ख्यातव्यान्येन
श्रवणाप्रतिषेधो न तूपस
र्जनत्वेन तदर्थमुक्तं शूद्रे वि
राम प्रान्यिनान श्रोतव्य
१३

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नां धारणं कार्यं स्तुतीनां च महात्मनां इतिहासपुराणेषु दृष्टोयं ब्रह्मवादिभिः नहि वेदेष्वधिकारः कश्चित्तस्य विद्यते वेदपस्य
तु रूपोयं हि ते वर्तमाने महात्मनः तस्यां याम मभवन् ततः प्रथमं वर्णो वै कृतं ऐंद्रेण हविषा तत्र हविः पूर्कं रहस्यतेः जुहोति द्वापदेवेन
ततः सूनोः प्रजापतेः शिष्यत्वेन तं एकमभिभूतं गुरोर्हविः अधरोत्तरचारेणायं तेन द्वर्णो वै कृतं यश्च तत्रान्तसमभवत् तस्मात् सर्वोऽस्य
वर्णो निजः ततः पूर्वेण साधर्म्यात्तुल्यधर्मा प्रकीर्तित इति काश्यपप्रश्न एतो विप्राणां प्रातिलोम्येन वेदा न हि धर्मावबोधकाः स्मृत इति
त्रयमेवार्थो व्यासेनापि प्रकाशितो भारतभागवतयोः स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरे इति वा पाठः इति भारतमाख्यानं कृ
पया मुनिना कृतमिति द्विजबंधवो द्विजात्युत्पन्ना वर्णसंकराः स्त्र्यादयस्त्रयी भवतो नाधिकारिण इति भावः तत्तु वादकत्वेन पुरा
णेष्वप्यनधिकारः भारतस्य तु तदनुवादकत्वेपि शिष्टाचारप्रदर्शनयाजागतत्वात् तदारस्य हितस्य धर्मस्यातस्य पूर्वोक्तत्वात्
तस्मात्सर्ववर्णसाधारणं पुराणं सर्वेषामपि साधारणमध्यवर्णोलोचितभाषितं तेषां हि नानाप्रकारकर्मानुवादेरुग्रा हि प्रकार

गोचर ४

ति १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि०विं विवेकाद्यानिष्ठतापि नियामकमाश्रयणीयमितरथात्वनियमप्रसंगात् न चास्मत्त्रातिरिक्तं नपरस्पाम इति तस्मादपान्तरम
२५ णीयाभावविशेषो धर्मे दृष्टवद्दृष्टप्येष्याः ननुसृत्यौतकर्माभ्युपगमे मन्त्रार्थवैपरीत्यमापद्येत न च प्रतिषिद्धं मन्त्रार्थविपरीताया
स्मृतिः सा तैरेव न इतिवचनादिति सत्यं नैतन्न्यायैर्मैनितं तैर्यत्नास्पदे स्वशाखोक्तमेव कर्तव्यमिति तस्यापि समानत्वात् न चौ
दितानुदितसमयाध्युषितहोमकालविधानेष्वुदिते जुहोति व्यामोवा स्वाहेति मध्यरात्रौ त्यादिना च यथाशास्त्रमपि नित्यानां स्व
शास्त्राविहितकालपरित्यागपरत्वेन नित्यार्थवादस्य व्यवस्थापितत्वे नार्थापत्त्युत्वात् तेनैतन्नास्तीदं पुराणोक्तमितिस्मृतिसदाचा
रानुसारकत्वोपस्थाने प्रमाणानि यदनुवादकानि तदधिकार्य्येव तेष्वप्यधिक्रियत इति न स्त्रीशूद्रादयः तेषां हि मन्त्राद्य
नधिकारात् प्रमाणप्रामाण्यं तारीनां तन्मूलत्वेनात्रप्रामाण्यं विष्णुधर्मशिवधर्मादीनां पुराणशेषत्वात् अष्टादशभ्यस्तु पृथक् पु राम
राणं यत्तु दृश्यते विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतमिति सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च वंशानुचरितं चेत्यपु २५

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

राणां पंचलक्षणमिति सर्गः सृष्टिः प्रतिसर्गः संहारः वृत्तिसामान्यलक्षणं विशेषसंज्ञास्तु विष्णुपुराणे ब्राह्मं पाद्मं वै
ष्णवं च शैवं भागवतं तथा तथान्यं नारदीयं च मार्कंडेयं च सप्तमं आग्नेयमष्टमं चैव भविष्यं नवमं स्मृतं दशमं ब्रह्मवैवर्तं लिंग
मेकादशं स्मृतं वाराहं द्वादशं चैव स्कांदं चात्र त्रयोदशं चतुर्दशं वामनं च कौर्मं पंचदशं स्मृतं मात्स्यं च गारुडं चैव ब्रह्मांडं च तत
तः परमिति कूर्मपुराणे अन्यान्युपपुराणानि मुनिभिः कथितानि तु आद्यं सनत्कुमारोक्तं नारसिंहमतः परं तृतीयं स्कांदमुद्दिष्टं
कुमारेण तु भाषितं चतुर्थं शिवधर्माख्यं साक्षान्नंदीशभाषितं दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परं कापिलं मानवं चैव तथैवो
शनसेरितं ब्रह्मांडं वारुणं चैव कालिकाह्वयमेव च माहेश्वरं तथा शांबं सौरं सर्वार्थसंचयं पराशरोक्तं प्रथमं तथा भागवतद्वयं
इदमष्टादशं प्रोक्तं पुराणं कौर्ममुत्तमं वेदार्थवित्तमैः कार्यं पत्तस्मृतं मुनिभिः ॥१॥ सत्तेयः परमो धर्मो नान्यशास्त्रेषु संस्थितः मा
वेदवाह्यास्स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निःफलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इति एषां लक्षणानि विस्तरभयान्नोच्यंते

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धर्मनिर्णयेप्रयोजनाभावात् मनुः प्रत्यक्षमनुमानंच शाब्दंचविविधागमं त्रयंसुविदितंकार्यंधर्मशुद्धिमभीप्सता आर्षं
धर्मोपदेशंचवेदमार्गानुसारिणा वेदशास्त्राविरोधिनेतिवापाठः यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरः मीमांसान्यायेऽर्थवादे
ष्वानुसंधत्ते ऐकमत्यंसंपादयति व्यासः धर्मशुद्धिमभीप्सद्भिर्नवेदादन्यदिष्यते धर्मस्यकारणंशुद्धं मिश्रमन्यत्प्रकीर्तितं
अतःसपरमोधर्मोयोवेदादवगम्यते अवरःसतुविज्ञेयोयःपुराणादिषुसंस्थितः एतेभ्योपियदन्यत्स्यात्किंचिद्धर्मविधायकं
नदूरतोवरंविद्धिमोहस्तस्यात्रयोपतइति शंखलिखितौ रागद्वेषादिदग्धानामज्ञानविषयाधिनां चिकित्साधर्मशास्त्रा
णां व्याधीनामिवभेषजमिति रागद्वेषशब्देनतन्मूलंभ्रांतिज्ञानंलक्ष्यते हारीतः अज्ञानतमसांधानांभ्रमितानांकुहेतुभिः
धर्मशास्त्रप्रदीपोयंधार्योमार्गानुदेशकैः हारीतः श्रुतिस्मृतीतुविप्राणांचक्षुषीदेवकीर्तिते काणस्तत्रैकहीनःस्याद्द्वाभ्या
मंधोद्विजःस्मृतइति देवलः शिक्षाव्याकरणंनिरुक्तंछंदःकल्पज्योतिषाणीतिवेदांगानि आर्षाःपूर्वरूनांनामप्रपाप्रजित्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

लाइतिहासाः आर्षाः आर्षे आर्षप्रयोगाः भविष्यपुराणे दृष्टार्थानुस्मृतिः काचिद्दृष्टार्थानपायरा दृष्टादृष्टार्थरूपान्या
न्यायमूला तथा १२ अनुवादस्मृतिस्त्वन्या शिष्टैर्दृष्टानुपंचमी सर्वा एता वेदमूला दृष्टार्थापरिहृत्य तु सत्तु थाकुरणस्य प्रयो
गश्च प्रयोगः कार्यगौरवात् सामादीनामुपायानां योगो व्याससमासतः अध्यक्षाणां च निक्षेपः कंटकानां निरूपणम्
दृष्टार्थेयं स्मृतिः प्रोक्ता ऋषिभिर्गरुडाग्रज संध्योपास्तिः सदा कार्या शुनोमांसं च भक्षयेत् अदृष्टार्था स्मृतिः प्रोक्ता ऋषिभि
र्ज्ञानकोविदैः पालाशं धारयेद्दंडमुभयार्थी विदुर्बुधाः विरोधे तु विकल्पः स्याज्जपहोमश्रुतौ यथा श्रुतौ दृष्टं यथा कार्यं स्मृतौ
तत्तादृशं यदि अनुक्तावादिनौ स्यात् पारिव्राज्यं यथाग्रहात् षड्गुणाः संधिविग्रहयानासनं आश्रयद्वैधीभावाः तेषां प्रयोगः
कार्यगौरवात् व्यस्ताः समस्ता अपि संध्याद्याः प्रयोज्याः एवं सामदानदंडभेदाश्चत्वार उपायाः कार्यगौरवादेव व्यस्ताः समस्ता
वा प्रयोज्याः संध्योपासनं सदा कार्यम् शुनोमांसं न भक्षयेदिति स्मृतिरदृष्टार्थैव दृष्टप्रयोजनाभावात् पालाशं धारयेद्दं

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.चिं. मित्युभयार्थो दृष्टार्थोऽदृष्टार्थश्च गोसर्पादिनिवारकत्वेन दंडधारणस्य दृष्टार्थत्वं पालाशनियमस्यादृष्टार्थत्वं दृष्टेप्रयो
२६ जनाभावात् न्यायमूला यथा जपहोमश्रुतौ न्यायतो विकल्पः सिध्यति यथा गायत्रीमधिकृत्य तिद्धेतस्संदर्शनात् अनुदिते
होममधिकृत्याह कुर्यादनुदिते भानावग्निकार्यमतंद्रित इति अनयोर्विरोधे विरुद्धविधानद्वयान्यथानुपपत्तिरेव विकल्पमूलं
विकल्पश्च सामिनिरग्निपरतया व्यवस्थितः तुल्यत्वेऽष्टदोषदुष्टविकल्पापत्तेः अनूक्तवादिनीत्यानुपारिव्राज्यं यथा गृहात्
अयमर्थः ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीत्यनया श्रुत्या क्रमे
वार्थमनुसरंतिरनुवदति ब्राह्मणः प्रव्रजेद्गृहादिति अयमपि विविदिषाबलाबलपरिज्ञाने उपयोक्ष्यते तथा वेदार्थवित्तमैः का
र्यं यत्स्यात्तदृषिभिः पुरा नयद्येनानुतिष्ठेत्तु तद्विशिष्टं तु वर्जयेत् ते हि वेदार्थतत्त्वज्ञा लोकानां हितकाम्यया प्रदिष्टवंतो एम
ये धर्मं ते धर्मं न विचालयेत् वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेद्यदि ऋषिभिर्निश्चिते तत्र का शंका स्यान्मनीषिणां २६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पारंपर्यागतो येषां वेदः सपरिबृंहणः । ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः इति सपरिबृंहणः सांगपुराणेतिहासः
एतेषामेव परिबृंहणार्थोपपादकत्वात् संक्षिप्तवेदार्थस्य विस्तरवाचकत्वात् हारीतः शिष्टाः श्रुतिस्मृतिविहितावस्थिताः प्रति
पत्तव्याः अवस्थिताः तानानुष्ठाननिष्ठाः आपस्तंबः शिष्टानृषीनधिकृत्य दृष्टो धर्मव्यतिक्रमम् साहसं चैव सर्वेषां तेषां
तेजोविशेषेण प्रत्यवायो न विद्यते तदन्वीक्ष्य प्रयुंजानः सीदत्यवरजो बलः व्यतिक्रमः बुद्धिपूर्वं गुरुतल्पाद्यागम्यागमनम्
यथा बृहस्पतेरुतथ्यस्य ज्येष्ठभ्रातुः स्त्रीगमनं पराशरस्य वा एणा धीवरकन्यागमनं साहसं क्रोधाग्निनासमीक्ष्यकारित्वं य
था वसिष्ठस्य हस्तौ पादौ च बद्ध्वा जलप्रवेशनं तेजो ज्ञानं तद्विशेषो साक्षात्कारणं रूपेण प्रत्यवायो न विद्येत पुष्करपलाशव
दनिर्लेपा इति भावः तदन्वीक्ष्य यो बलो ज्ञानादिरहितस्तत्कर्म प्रयुंजानः कर्मयः प्रयुंक्ते अवरज इदानींतनः सीदति विनश्य
तीति भावः अतएव शंखलिखितौ आपत्स्वपि हि कष्टासु परस्वानि न कामयेत् नाभस्यं महतां येकिंचित्पूर्वैश्चरितं चरेत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

तेजोमयानि पूर्वेषां शरीराणीन्द्रियाणि च पापैस्तेनोपलिप्यन्ते पद्मपत्रमिवांभसा सुरां पिबन्ति त्रिदशाः साचापेया द्वि
जातिभिः हरन्ति चेत्तं यस्मिन्हर्त्तव्यास्मिन्देवविधेत इहपूर्वचरितं निषिद्धमभिप्रेतम् महाभारते कृतानि यानि कर्माणि दैवतैर्
मुनिभिस्तथा नाचरेत्तानि धर्माणि भुक्त्वा वापि न कुत्सयेदिति बौधायनः पंचधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतो यानि द
क्षिणतस्तानि व्याख्यास्यामो यथैतदनुपनीतेन सहभोजनं स्त्रिया सहभोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपरिणय
नमित्यथोत्तरत ऊर्णाविक्रयः सीधुपानमुभयतो दद्भिर्व्यवहार आयुधीयकं समुद्रयानमिति नेतदितरस्मिन् तस्मिंश्चैव देशे
तत्प्रामाण्यं नान्यत्र गौतमः उभयत्र धर्मशास्त्रविरुद्धत्वं प्रतिपत्तिः तत्र देशप्रामाण्यं नैतान्यत्रेति यमः वेदाः प्रमाणं स्मृत
यः प्रमाणं धर्माश्रितं च वचनं प्रमाणं यस्य प्रमाणं न भवेत्प्रमाणं कस्तस्य कुर्याद्वचनं प्रमाणं न यस्य वेदा न च धर्मशास्त्रं न वृद्ध राम
वाक्यं हि भवेत्प्रमाणं स धर्मकृद्दृष्टिहतोऽद्गुणत्मा नात्माऽपि तस्य हि भवेन्न वेत्प्रमाणं यमः यथा हि मृण्मयं भांडं दुष्टं वर्षशतेनापि १७

पुनर्दाहेन शुध्येत धर्मेणानेन सत्त्याद्विजा इति अपपष्ठेत् तत्र याज्ञवल्क्यः चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव च सं तां ४
भूते यं स धर्मः स्यादेको वाध्यात्मवित्तम इति अध्यात्मवित्तमः साक्षात्कृतात्मतत्त्वः चत्वारश्चतुर्वेद धर्मज्ञा नाइति वोढव्यं स्पा २
त्रैविद्यमेवं वेति वेदत्रयतत्त्वोपसंहारात् एवं बालिखितो ऋग्यजुः सामाथर्ववेदः षडंगविदुष्टरन्ति नैं पापिको नैष्ठिको
ब्रह्मचारी पंचाग्निरिति दशावरपर्षत्समवाये धर्मानुव्याहरणं नैष्ठिकग्रहणमुपकुर्वाणकस्यव्यवच्छेदार्थं वसिष्ठः त्रैविद्यरद्धा
यं ब्रूयुः धर्मोधर्मविदो जनाः पवने पावने चैव स धर्मो नात्र संशयः अथवा विद्या त्रिविद्या यो वेदत्रयमभ्यस्तवान् स द्विजः द्विगोर्लु
गणादन्यत्रपणो लुक् अत्र लुकापि वृद्धिरिति भाष्यटीकाकारः यद्वा तिस्रष्वपि विद्यासु रद्धाः तानर्वेतः त्रैविद्यमिति सार्थे
७५ घञ् पतने पतननिमित्ते कर्मणि पातके पावने तच्छुद्धिसंपादके प्रायश्चित्तकर्मणि यं ब्रूयुः स धर्म इति भावः मनुः अनाम्नाते
षु धर्मेषु कथं स्यादिति चेद्भवेत् यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशंकितः दशावरा वा परिषद्यं धर्मं परिकल्पयेत् त्र्य

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.सिं. वरा चापि वृत्तस्थास्तद्धर्मं न विचालयेत् दशावरां दश अवरे अल्पे यस्याः सा पर्षत् एकादशादीनां पर्षत्त्वमस्यमते अनज्ञाते
१८ दशावरैः शिष्टैरूहद्भिरलुब्धैः प्रशस्तं कार्यं अनज्ञाते अनुवगते पैठीनसिः अलोलुपा ह्यदांभिका धर्मशास्त्रप्रणेतारो ह्यम
न्तारिणो दशैव धर्मं व्यवस्यंतीति वेदपारगाः प्रणेतारः प्रवेयितारः इति करणे हेतौ इति हेतौ वेदपारगा एव धर्मं व्यवस्यंति
पुनः शंखलिखितौ त्रैयान्सप्रत्यारो वेदविदो धर्मशास्त्रविदिनः पंचावरामेकादशावरेषु धर्मानुव्याहरणं यथावलेपं शा
स्त्रतत्ते यद्ब्रूयुस्स धर्मः यथावलेपं यथादोषं पैठीनसिः चत्वारो वा त्रयो वापि यद्ब्रूयुर्धर्मपाठकाः वेदपारग एकस्त्रतत्र
मा सम्मतं सद्ध इति अयं यो विकल्पो संख्यापरः सगुणा व दगुणा व व्यवस्थया व्यवस्थिताः अत एव वसिष्ठः चत्वारो वा त्रयो
वापि यद्ब्रूयुर्वेदपारगाः स धर्म इति विज्ञेयो नेतरेषां सहस्रशः इति अंगिराश्च चत्वारो वा त्रयो वापि वेदवंतोग्निहोत्रिणः ब्राह्म राम
णाः समवायस्थाः पर्षदित्यभिधीयते अनाहिताग्नयो ये तु केवलं वेदपारगाः पञ्चैते वेदशास्त्रज्ञाः पर्षेत्सेताद्युदाहृताः १८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ये तु धर्म्मविशेषविप्राः कार्याकार्यविचक्षणाः प्रायश्चित्तप्रणेतारः सप्तैते परिकीर्तिताः एकविंशतिसंख्यातैर्मीमांसान्याय स्थानैः
पारगैः वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रचक्षते यतीनां सम्यतपसां ज्ञानविज्ञानवेदिनां शिरोव्रतेन स्नातानामेकोपि परिष
द्भवेत् ये तु पूर्वमयाप्रोक्ताः स्थितायायावरेष्वपि त्रयोपि परिषद्रूपा सर्वपापापहारिका एषा लघुषु कार्येषु मध्यमेषु तु म
ध्यमाः महापातकशोध्येषु शतशो भूयएववा अतऊर्द्ध्वंतु ये विप्राः केवलं नामधारकाः परिषत्त्वं न तेष्वस्ति सहस्रगुणिते
ष्वपि समवायस्यामिलिताः वेदशास्त्रताः इति वेदोपकरणभूतं शास्त्रं वेदशास्त्रं रताः कार्याकार्यविचक्षणाः विहितनि
षिद्धतत्त्वज्ञानकुशलाः गुणएकर्षति एकविंशतिसंख्यातं ज्ञानं तत्त्वार्थसंबोधः विज्ञानं लौकिकवैदिकविद्यासाधारणं शि
रोव्रतं वेदाध्ययनपरिसमाप्तौ सर्वविद्याव्रतस्नानं परिषद्भवेत् परिषत्कार्यंकृद्भवेत् ये तु यायावराः शिलोंछवृत्तयो दानशील
गृहस्थविशेषास्तेऽग्निहोत्रिणो लघुषु स्वल्पपापेषु महापातकशोध्येषु महापातकशोधनेषु भावेरपन् हारीतोपि चातुर्विद्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि. चिं. विकल्पांगरिष्ठमेधिपञ्चाशन्मिता इतिपारिषदं दशावरमाहुः चत्वारःस्नातकाधर्मविदस्त्रयोविप्राधर्मविदोद्वौवाधर्म्म
२९ विदावेकोचोभयविनासांपूर्वाःपूर्वाःश्रेयस्योभवंतीति गौतमोपि चत्वारश्चतुर्णां पारगावेदानां प्रागुत्तमास्त्रयःआ श्र
मिणःपृथग्धर्मविदस्त्रय एतांदशावरेत्याचक्षते असंभवत्वेतेषांश्रोत्रियोवेदविच्छिष्टो विप्रतिपत्तौयत्तोयमप्रभवः
उत्तमाः प्रव्रजिताः विप्रतिपत्ताविप्रत्ययदाहनत्कार्यमितिशेषः अयमितिवेदःपरामृश्यते अप्रभवःअपौरुषेयःमनु
वसिष्ठयमाः पैठीनसिश्चप्रथमो अव्रतानाममंत्राणांजातिमात्रोपजीविनां।सहस्रशःसमेतानांपरिषत्त्वंनविद्यते यंवदं
तितमोभूताभूर्खाधर्ममतद्विदः तत्पापंशतधाभूत्वातान्वक्तृननुगच्छति अंगिराः चतुर्णामपिवेदानांपारगायेद्विजोत्तमाः य
थावेदंविनार्थज्ञोह्यात्रुवैर्ण्यमितिस्मृतं धर्मस्यपर्षदस्त्वेवमापाद्यितव्यमपरस्य च त्रयाणांयःप्रमाणज्ञाःसविकल्पीभवेद्द्विजः सम
णदेहदशविकल्पेच शिक्षायांचस्तनिष्णिनः ज्योतिषास्यनेचैवसनिरुक्तेगविद्भवेत् वेदविद्याव्रतस्नातःसम्यक्संधोजितेन्द्रियः २९

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनेकधर्मशास्त्रतः प्रोक्ते धर्मपाठकाः ब्रह्मचर्याश्रमादूर्द्ध्वं गृहाश्रमाश्रमिणस्त्रयः वेदेषु सत्स्वपि ते धर्मे ये मया परिकी
र्तिता पर्वणां बालस्यानां तु सानां तां द्विगुणास्मृता वैश्यानां त्रिगुणाश्चैव पर्वद्वन्द्वं स्मृतं ज्योतिषामयनं ज्योतिःशास्त्राद्दे
गमुक्तमेव निरुक्तसाहचर्यात् अत एव सनिरुक्ते निरुक्तसहिते इदं च वेदेषु पादिकं तत्त्रिपादीनां शोध्यानामेव पक्षद्वये तेवैगुण्य
दिकं तन्यातिलोम्येनोत्कृष्टजायागमनादिविषयं अत एव भविष्यपुराणे पर्वद्विधानमथैव प्रोक्तमेतावत्सेनतु द्विगुणा तत्त्रि
याणां तु वैश्यानां त्रिगुणा स्मृता चतुर्गुणा तु शूद्राणां पर्वद्वन्द्वमहात्मनां पर्वद्वयव्रतं प्रोक्तं शुद्धये पापकर्मणां अनेन तापय
नेविप्रवर्णानामुत्तमाहते अधमानां तु वर्णानामुत्कृष्टहनने गुहे तथा गुरुतने स्तेयः त्राहीनां न संशयः गृहे आलिंगने धर्मा
पेक्षो धकप्रमाणबलाबलमाह मनुः श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ उभावपि हितौ धर्मौ सम्यगुक्तौ मनीषिभिः
उदिते नुदिते चैव समयाध्युषिते तथा सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः समयाध्युषिते अर्द्धोदिते स्वरवोदितानुदित

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰चिं॰ २० इत्युच्यते अत्र गौतमः तुल्यबलविरोधे विकल्प इति जाबालोऽत्र विवेचयति श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी
अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सदा सदा सर्वकालाविरोधे स्मार्तमपि वैदिकवदेव सदा कार्यं इदं प्रथमतयेति भावः
शंखलिखितौ तुल्यश्रुतिविरोधे विकल्पः न च वेदमूला स्मृतयः श्रुतिर्हि गरीयसी सम्यगाम्नाय इति आम्नायेनेरवेक्षेरा
परत्तिः स्मृतिर्व्यवहितत्वात्तस्मिंश्च बलीयस्त्वं यथाह बृहस्पतिः वेदार्थोपनिबंधत्वात् प्राधान्यं तु मनोः स्मृतं मन्वर्थ
विपरीता तु या स्मृतिः सा न शस्यते उपनिबध्यतेनेनेत्युपनिबंधो ग्रंथः वेदार्थ उपनिबंधो यस्य स वेदार्थोपनिबंधः श्रुति
श्च यद्वै मनुरवोचत्तद्भेषजमिति किंच गौतमः देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणं आम्नायैर्वेदादिभिः स्मृ
त्युक्तो भविष्यपुराणे श्रुत्या सह विरोधे तु बाध्यते विषयं विना व्यवस्थायां विरोधेन कार्यो व्यत्र परीक्षकैः स्मृत्योर्विरो रम
धे तु अर्थशास्त्रस्य बाधनं परस्परविरोधे तु न्याययुक्तं प्रमाणवत् अदृष्टार्थविकल्पस्तु व्यवस्थासंभवे सति स्मृतिशास्त्रविक २०

स्मृतिशास्त्रविकल्पस्तु व्यवस्थासम्भवे सति १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्यस्तु आकांक्षापूरणोस्तीति अविरोधेन व्यवस्थाया अन्यत्र विषयः कार्य इत्यर्थः स्मृत्यर्थेन धर्मशास्त्रार्थेन पश्चार्थे
शास्त्रार्थो मन्वादिप्रणीतैरेव याज्ञवल्क्यप्रयोगो दृष्टार्थः स च दृष्टार्थेन धर्मशास्त्रेण बाध्यते यस्तु दृष्टार्थः प्रजापालनशस्त्रजीविता
दिरूपः स साकांक्षो दृष्टार्थेन धर्मशास्त्रेण निराकांक्षः संपादनीय इति एतेनैतदपि सूचितं सर्वत्र साकांक्षेपि धर्मशास्त्रेणैव
कार्यैकवाक्यं न रेण संपाद्यमिति न तत्र समुच्चय इति शाखान्तरीयस्याप्युपसंग्रह इति आह वांगिराः प्रमाणानि प्रमाणस्थैः परिपा
ल्यानि यत्नतः सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः प्रमाणसहितं यस्मात्सर्वं गम्यते सुखं अप्रमाणप्रमेयस्य दुःखे
नाधिगमो भवेदिति दिङ्मात्रमेतत् न्यायसिद्धमेतदिति नाधीमतां दुरूहं ॥ ॥ इति प्रमाणनिर्णयो धर्मजिज्ञासा ॥ ॥
अथास्यैव धर्मतत्त्वं खलिखितौ देशकालउपायो द्रव्यं श्रद्धापात्रं त्याग इति समस्तेषु धर्मोदयः साधारणो यथा विपरीतः
श्रद्धापात्रसंपन्नो धर्मः कालापेक्षः श्रद्धाद्रव्योत्पत्तिरिति कालस्तन्मूलो देशः देशो ब्रह्मावर्तादिः कालो विहितः उत्पत्तेन

निमित्ततः ।

तत्र धर्मलक्षणानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰चिं॰ संक्रान्त्यादिः उपायइति कर्तव्यता स्त्रद्धेति शास्त्रार्थे इदमित्थमेवेति दृढप्रत्ययः पात्रं विधानपोवृतसंपत्त्वं साधारणो धर्मोदयः
२१ अयं च समुदायः प्रत्येकमपि तुल्यत्वेनैव धर्मोदयः धर्मफलोदये समानएवेति भावः अन्यथाभक्त्याद्येकैकराहित्येनापि धर्मः स्या
दिति विष्णुपुराणे उत्तरं यत्समुद्रस्य हिमाद्रेश्चापि दक्षिणं वर्षं तद्भारतं नाम भारती यत्र संततिरिति तथा अत्र जन्मसहस्रा
णां सहस्रैरपि सत्तम कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात् गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे स्व
र्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मभूते अवाप्य तां कर्ममही
न३ मरंते तस्मिंल्लयं ये त्वमलाः प्रयान्ति एतेन सकलकर्माङ्गत्वं भरतखण्डस्येति सिद्धम् तत्राप्यार्यावर्तस्य। ततोपि मध्यदेशस्य ततोपि
कुरुक्षेत्रादि ब्रह्मर्षिदेशस्य ततोपि देवनिर्मितस्य ब्रह्मावर्तस्योत्कृष्टत्वमिति बोध्यम् भविष्यपुराणे ब्रह्मावर्तः परो देशः राम
ऋषिदेशस्ततनंतरः मध्यदेशस्ततो न्यून आर्यावर्तस्ततनंतरः अत्रैतरस्त्वधमतः नमः अल्पार्थे अनुदराकन्येतिवत् मनुः सरस्व २१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीदृषद्वत्योर्देवनद्योर्यदंतरं तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते अस्मिन्देशे य आचारः पारंपर्यक्रमागतः वर्णानां सांतरा
लानां स सदाचार उच्यते कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनयः एष ब्रह्मर्षिदेशो ब्रह्मावर्तादनंतरः एतद्देशप्रसूतस्य सका
शादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि प्रत्यगेव प्रयागाच्च मध्यदे
शः प्रकीर्तितः आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् तयोरेवांतरं गिर्योरार्यावर्तं विदुर्बुधाः कृष्णसारस्तु चरति मृगो य
त्र स्वभावतः स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्त्वतः परः एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः शूद्रस्तु यस्मिन्कस्मिन्वा निव
सेद्वृत्तिकर्शितः वर्णानां सांतरालानामिति अंतरालाः संकरजातयः मत्स्यादिदेशा बहुवचनांता देशपरा एव तद्राजत्वात्तद्धि
तस्य बहुत्वे लुक् मत्स्यो विराटदेशः पंचालाः कान्यकुब्जोपलक्षितो देशः शूरसेनका मथुरादेशः अग्रजन्मनो ब्राह्मणात् विन
शनं सरस्वतीनद्यांतर्धानप्रदेशः स्वभावतो बलान्नयनं विना यज्ञियो यज्ञार्हः म्लेच्छदेशो यज्ञानर्हः वृत्तिः धनार्जनोपायः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदभावेकर्षितः वासिष्ठः धर्मः आर्यावर्तः प्रागादर्शात्प्रत्यक्कालकवनादुदक्पारियात्राद्दक्षिणेन हिमवत उत्तरेण च विंध्या
द्देः धर्माय आचारास्ते सर्वे प्रत्येतव्याः नत्वन्ये प्रतिलोमकृत्तधर्माणः एनमार्यावर्तंप्रचक्षते गंगायमुनयोरंतरएप्येके यावद्वा
कृष्णमृगो विचरति तावद्ब्रह्मवर्चसमिति अथापि भाल्लवीये निदाने गाथामुदाहरंति पश्चात्सिंधुर्विहरणी सूर्यस्योदयनो
पुरः यावद्वापि कृष्णमृगो विचरति तावद्ब्रह्मवर्चसमिति नत्वन्ये यतस्ते धर्मा प्रतिलोमाउक्तधर्माणः विपरीता स्फुटस्वभावाः
कृत्तशब्देन ध्वननणावगतप्रदेशवचनेनास्फुटतालक्ष्यते पुनरार्यावर्तानुवादो त्वर्थसंज्ञाप्रदर्शनार्थः आर्यास्त्रयो वर्णा आ
वर्तंते यस्मिन्निति एतेनेतदपि सूचितं यदार्यैरत्रैव वस्तव्यमिति ब्रह्मवर्चसमत्रैव रतस्वाध्यायसंपत्तिः भाल्लविनः सामग
विशेषाः निदानमिति नदीयग्रवस्त्रविशेषः सिंधुर्नदीविशेषः विहरणी नदी मालवेषु जनकपर्वतसमीपे वरप्रुरामेण धनुः दम
कोट्या रघौ कुंडं भित्वा निर्मितेति तद्देशीयप्रसिद्धिः शंखाति खिनावपि देशा आर्यैर्गणा आगस्तात्रवोदुदयाचावदुत्र्चे गिरयो पा २२

ध्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

वन्तुरापा सरितः प्राक्सिन्धवो देशः सनातनपुण्यः कृष्णमृगो वा यावद्विचरति तावदाचारः स्यात्प्राक्सिंधुसौवीराद्दक्षिणेन हिम
वतः पश्चात्कांपिल्यादुदक्पारियात्रादनवद्यं ब्रह्मवर्चसं सर्वेषां मते अन्यदेशजातिकुलधर्म्मो धर्माणामन्वायाः अनवद्यं अविकलं
अन्वयाः संतानाः प्रत्येतव्या इति शेषः अत्र मुख्यत्वं नान्यनिषेधः पैठीनसिः आहिमवत आ च कुमार्याः सिंधुवैतरणी नदी सूर्य
स्योदयनं पुरा यावद्वा कृष्णमृगो विचरति तत्र धर्मश्चतुष्पादो भवति संवर्तः स्वभावाद्यत्र विचरति कृष्णसारः सदा मृगः धर्मदेशः
स विज्ञेयो द्विजानां सर्वसाधनः म्लेच्छविषये श्राद्धं न गच्छेन्म्लेच्छविषयं परपाने पुनः पीत्वा न साम्यमुपगच्छति चातुर्वर्ण
व्यवस्थानं यस्मिन्देशे न विद्यते तं म्लेच्छदेशं जानीयादार्यावर्तमतः परं बौधायनः आनर्ताङ्गमगधासौराष्ट्राः दक्षिणापथाः
उपावृत्सिंधुसौवीर एते संकीर्णयोनयः आरट्टान्कारस्करान्पुंड्रान्सौवीरान्वंगकलिंगान्प्राणूनानिति च गत्वा पु
नस्तोमेन यजेत सर्वपृष्ठया वा अथाप्युदाहरंति पद्भ्यां स कुरुते पापं यः कलिंगान्प्रपद्यते ऋषयो निष्कृतिं तस्य प्राहुर्वै

नि.चिं
२३

श्वानरंहविः स्तोमोत्रद्वात्यस्तोमः नस्यसंस्कारार्थत्वात् उक्तंहि अंगवंगकलिंगेषु सौराष्ट्रमगधेषुच विनायात्रांनरो
गत्वापुनःसंस्कारमर्हतीति सर्वेप्येते सर्वेमेधैवदेशाः नत्रहिसार्वेवेदसरस्तिरणा आनर्तोदेशो द्वारकोपलक्षितो
विषयः अंगवंगप्रदेशः यत्रशिखरभूमिरिति प्रसिद्धिः उपाहन्योहनैप्रदेशः अतएवविष्णुपुराणं पूर्वेकिरणा यस्यांते प्रान्त
पश्चिमे यवनाःस्मृताः ब्राह्मणाः क्षत्रियावैश्याशूद्रामध्येव्यवस्थिताइति नत्रापिगमननिषेधमाहश्रुतिः सावाएषांदे
वतैनासीद्देवतानांपाप्मानंमृत्युमपहत्ययत्रासांदिशामंतस्तद्गमयांचकारतदासांपाप्मनोविन्यदधात्तस्मान्नजनमि पात्रा
न्तमियान्नेत्पाप्मानंमृत्युमन्वयानीति आसन्यशालरूपदेवतानिरक्षतेनरवागादीन्द्रियदेवतापाप्मापोनरेरोषुस्थितोस्ति
तत्रगच्छतोनरस्यापोभवतीतिभक्तितात्पर्यार्थः अपिच प्रपावाजा अभिधवोहविश्मतोघृताच्येति सामिधेन्यांघृताची राम
परस्यांपर्वाःसमये विदेघमाथवमुखात्पतितेनाग्निना वैश्वानरेण यावतीभूमिः परिदग्धातावत्यामेवब्राह्मणो ग्रा २३

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लक्षणागङ्घयु। योवत्यम्बनघस्तेनातिक्रांता सावनीरेवनदेषु इति शाखापथी श्रुतिरथैवादमुक्तवती यथा विदेघो ह मा
थवोऽग्निं वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः पुरोहित आस तस्मै ह स्मामन्त्र्यमाणो न प्रतिशृणोति नेन्मेऽग्निर्वैश्वा
नरो मुखान्निष्पद्याता इति तमृग्भिर्ह्वयितुं दध्रे वीतिहोत्रं त्वा कवे इत्युपक्रम्य तं त्वा घृतस्नवीमह इत्येवाभिव्याहरदथास्य घृत
कीर्तावेवाग्निर्वैश्वानरो मुखादुज्जज्वाल तं न शशाक धारयितुं सोऽस्य मुखान्निष्पेदे स इमां पृथिवीं प्रापाद तर्हि विदेघो मा
थव आस सरस्वत्यां स तत एव प्राङ् दहन्नभीयायेमां पृथिवीं तं गोतमश्च राहूगणो विदेघश्च माथवः पश्चाद्दहन्तमन्वीयतुः
स इमाः सर्वा नदीरतिददाह सदानीरेत्युत्तराद्गिरेर्निर्धावति तां हैव नातिददाह तां ह स्म तां पुरा ब्राह्मणा न तरन्त्यनतिदग्धा
ग्निना वैश्वानरेणेति वैश्वानरादग्धत्वे हेतुत्वेन ब्राह्मणाकर्तृकसदानीरानदीसंतरणाभावो दर्शितोऽनुवादेन अनुवादस्य प्र
सिद्धस्य भवेदिति पौर्वापर्येण ब्राह्मणवचनानां दर्शयति अत्रायं विशेषः तीर्थनिमित्तनिषिद्धदेशागमपि न दोषाय । वि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नायात्रां नरो गत्वेति प्रावृत्तिपादितवाक्येन सूचितत्वात् व्यासोपि सर्वे शिलोच्चयाः पुण्याः सागराः सरितस्तथा अर
ण्यानि च मरुस्थानि विशेषात्तैमिषस्तथा देवीपुराणे देशेन योगयात्रैलं गंगा नर्मदा पुष्करं केदारं भासनंदाच कुंडकं पुष्क
राह्वयं सोमेश्वरं महापुण्यं तथामरकंटकं कालंजरं तथा विंध्यं यत्र वासो गुहस्य च तथा शिवदा आश्रमाः पुण्याः स
र्वे नद्यः प्रस्रवणाः स्नानोपवासादिफलदाः सततं नृणां इत्याद्यनेकम्लेच्छदेशस्य तीर्थाश्रमनदीमाहात्म्यप्रवक्त
वचनानि च यथाविचारेणात्र समर्थ्यात्रार्थापत्त्या स्वयं वक्ष्यति ॥ यत्तीर्थादिसमुद्देशेन म्लेच्छदेशेपि गच्छतो विधानाद्दोष इति दि
ङ्मात्रमेतदिति सिद्धम् ॥ ॥ इति श्रीमद्देशपकुलावतंसगोभिलगोत्रसाधारणकुलप्रदीपविदुरसपुत्रश्रीजालपराय
प्रसुतस्वरूपचन्द्राऽग्निचित्स्थपतिमहायाज्ञिकश्रीपुरुषुशर्मविरचिते निर्णयचिन्तामणौ धर्मस्वरूपप्रमाणदेशनिरू
पणः प्रथमसमप्रखः ॥ ॥ अथ परिभाषा तत्र भविष्यपुराणे सम्यक्कृत्वा यत्नेन कर्म कर्तव्यमधिकारिणा निष्कामे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नसदावीरकामोकामान्वितेननतु आचारयुक्तः श्रद्धावान्वेदतो ध्यात्मवित्तमः कर्मणां फलमाप्नोति न्यायार्जितधनश्च
यः अस्यार्थः संविधानं यथाविहितकर्मानुष्ठानं अधिकारिणा अधिकारः फलस्वाम्यम् अतो नर्त्विजः कर्म कुर्वन्तोप्यधिकारि
णः तेषां किंचिद्दानमात्रादिफलभागित्वेपि साध्यस्वर्गादिफलस्वाम्याभावात् उक्तं च जैमिनिना अर्थी समर्थो विद्वान्शास्त्रेणापर्यु
दस्तोधिकारी अधिकारिविशेषणान्येतानि अर्थी तत्र यागसाधनद्रव्यं तद्वत् अतो व्रीहियवादियागसाधनद्रव्यनाशे संकल्पित
द्रव्यसदृशेन प्रतिनिधिनार्थित्वविशेषणं संपाद्याधिकारः प्रवर्त्तते अत्र द्वितीयोर्थे शब्दस्तंतो पाठो द्रष्टव्य इति केचित् द्वितीयस्यार्थः
शब्दस्य प्रयोजनमर्थः अर्थी प्रयोजनवान् अतो प्रयजनवांश्चतुर्थाश्रमी नाधिक्रियते तत्र तत्र काम्यत्वेनयागाकाम्यत्वेनेव
तत्त्वेष्वसात् तदुक्तं फलयुक्तानामारंभे यथा कामी फलार्थित्वादिति द्रव्याद्यभावेनासामर्थ्याच्च समर्थश्चाधिक्रियते
सामर्थ्यं च यथा श्रुतकर्मणां निर्वाहयोग्यता उक्तं हि कात्यायनेन देवाद्यधिकाराभावप्रसंगे मनुष्याणां वारंभसामर्थ्यादिंगही

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि·विं·
२५

नाश्रोत्रियषंढशूद्रवर्ज्जमिति मनुष्याएवाधिक्रियंतेन देवादयः तेहियथाश्रुतंकर्मानुष्ठुं समर्थान देवादयः देवैस्तावद्देवा
न्तराभावाः नचतेभ्योन्येदेवाः संतियान्यजेरन् अभृगूणामशुचित्वादनधिकारः ऋषीणामार्षेयाभावात् भृगूणामासंनचेतन
त्वात् एतेष्ववितरे विगुणंकर्मस्यात् एवंसर्वमनुष्याधिकारप्राप्तावाह अंगहीनाश्रोत्रियषंढशूद्रवर्जमिति आरंभसामर्थ्या
भावादेवांगहीनास्तावत् अंधस्याज्यावेक्षणे असामर्थ्यम् बधिरस्यापांसंबोधनश्रवणे मूकस्यसर्वमंत्रोच्चारणे पंगो
र्विष्णुक्रमे एतेष्वविगुणाविगुणंकर्मभवति अश्रोत्रियस्याविद्वत्वात् षंढस्याशुचित्वात् अद्रव्यत्वाच्च शूद्रस्तर्ह्यधिक्रियताम् तस्यहि विभाधनाधिकारःस यंते अशुचितं च ४
द्रव्यवानमंगहीनश्चेति संतिचास्यदर्शनानि हविष्कृदाकाने आधावेतिशूद्रस्यैनपामस्तु शूद्रस्येति अतो अपिवाशीर्वदघशूद्र
स्येति नैतनदेवं तस्यार्थित्वविशेषणवत्त्वेप्यवैधत्वेनानधिकारात् अवैधत्वमेवकुत इतिचेत् उच्यते ब्राह्मणराजन्यवैश्या रम
नाइतिश्रुतौ ब्राह्मणादीनामेवोपनयनंश्रूयते वसंतेब्राह्मणमुपनयीत ग्रीष्मेराजन्यं शरदिवैश्यमिति उपनयनंचवेदाध्य २५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्यहिमातामहस्ते वैश्यास्य शूद्रत्वम्
पदसूः २

यनाधेयम् अपि च वेदाधिकारं प्रकृत्य शूद्रस्यामनंति प्रवणेत्र युक्ततुम्यांग्न्योत्र प्रकरणं उच्चारिजिकाद्देदोधारणोशरीरभेद इति
यानि तु दर्शितानि तानि रथकारविषयाणि तस्य हि मातामही शूद्रीति तदुक्तं याज्ञवल्क्येन माहिष्येण करण्यां तु रथकारः प्रजायते इ
ति माहिष्यस्तु वैश्यायां शूद्रायां तु राजन्यान्माहिष्योग्रौ सुतौ मतौ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृत इति वचनात् राजन्याद्द्वि
यां वैश्यकन्यायां माहिष्यः पुत्रो जायते वैश्याद्द्वितीयायां शूद्रायां करणः पुत्रो जायते धन्यातु करणी सा चेन्माहिष्येण परिणीता ताभ्यां
रथकाराख्यः पुत्रो जायते अतः करणी शूद्रादुहिता तद्द्वारा रथकारस्य शूद्रव्यपदेशः किं च स्त्रियास्तर्हि नाधिकारः प्राप्नोत्यग्नीना
दधीत स्वर्गकामो यजेतेत्यादिकर्मविधायकवाक्येषु पुल्लिंगेन संख्यया वा तद्प्रतीतेः प्रत्युत स्त्रीशूद्रा मंत्रवर्जिता इति निषेधाच्चेति
प्राप्ते आह स्त्री चाविशेषादिति स्त्री चाधिक्रियते अविशेषादिति यतः श्रूयमाणामप्येतल्लिंगसंख्यावचनविशेषाप्रमत्तः अ
नुपगतत्वात् विधेयगते लिंगसंख्ये विशेषकरे यथा पशुमालभेत अत्रपुंस्त्वमेकत्वं च विवक्षितं यथा च वसंताय कपिंजलानालभ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि० विं. नेति अत्र बहुत्वं पुंस्त्वं च अन्यथा बहुत्वं त्रित्वपरमिति कपिञ्जलाधिकरणे इयएव न स्यात्तर्हि अन्योपि यजमानं फलस्वामिनोमवे संवत्सः ९

२६ पुंविशेषादित्येवं प्राप्त आह दर्शनाद्धु दृश्यते चायमर्थो यथा स्त्री चाधिक्रियते मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमिति पत्न्या

ऽप्यमवेक्ष्यते यजमानो वेदं दधाति परंतु पुंसा सहाधिक्रियते न पृथक् येनैकस्मिन्नेव प्रयोगे यजमानसाध्याः पदार्थाः दृश्यंते पत्नी

त्विजः कुतो नाधिक्रियन्त इत्याह ४ साध्याश्च तयोस्त्र द्रव्यं साधारणं श्रूयते तच्चानतिचारश्रुतेः धर्मे चार्थे च कामे च नातिचरितव्यमिति तस्मात्सहाधिक्रियते तुल्यफ

लत्वात् अत एव पत्नीः प्रकृत्याह प्राणो हि रोहोसो रोहं नायामामंत्रयते जाय एहि स्वो रोहावेति रोहावेत्याह जायात एव जायामामंत्रयते धौ

ह्येष आत्मनो यज्जाया तस्मादेव यावज्जायां न विंदते नैव तावत्प्रजायते सर्वो हि तावद्भवत्यथ यदैव जायां विंदते प्रजायते तर्हि हि

सर्वो भवति सर्व एतां गतिं गच्छतीति तस्माज्जायामामंत्रयत इति श्रौतचनिकी सहक्रिया यथाह मनुः नास्ति स्त्रीणां पृथग्यज्ञो न एम

व्रतं नाप्युपोषणं शुश्रूषयति भर्तारं तेन स्वर्गे महीयत इति रथकारस्याधाने रथकारो जातिविशेषो रूढः स आधानेऽधिक्रियते यो २६

ज्ञा ३

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गत्याचित्येकर्मासंभवात् साहित्यावयोगमेवाधिकेनुवर्तते नकालांतरे इति संक्षेपः निषादस्थपतिर्गावेधुके धिकृतः सचायं
कर्मधारयः समासः पदद्वयेपिस्वार्थवृत्तित्वात् निषादश्चासौस्थपतिश्चेति षष्ठीसमासेत्वेकपदस्यास्वार्थवृत्तित्वात् नचैतेनाध्य
यनकल्पनं श्रुत्याधिकरणबाधितत्वात् तस्माद्विधानान्यथानुपपत्त्यैवानन्यगतिकमंत्रपाठाधिकारस्तत्काले कल्पनीयः वावकी
र्णिनोगर्दभेज्या अवकीर्णिस्त्रीगामीब्रह्मचार्युच्यते तस्यगर्दभेज्यानिर्ऋतिदेवताकापक्षेविहिता पक्षांतरेतुकामाद्युतयः
तत्राधिक्रियते नचनिषादस्थपतीष्टौगर्दभेज्यायावाधानमाक्षिप्यत इत्यत आह लौकिके एतदुभयंलौकिकेग्नावेवभवति नाधा
नेसंस्कृते आभ्यांहविःकृतिरूपाभ्यांतदेवापेक्षणीयं यत्रकृत्स्नं गस्यात् नचाधानं दर्शपूर्णमासांगं स्वकाले पुरुषार्थत्वेन विधा
नात् नाप्यकरणोत्पत्तिरनारभ्यवादः आश्रयित्वात्सर्वगुण इत्यवकाशः अहूर्यादिगुणसंपादकत्वेन फलवत्वेन प्राधान्यात्
नचापिततेपतिकर्माधानप्रसक्तेः साधारणाक्कानिबाधापत्तेः दर्शपौर्णमासयोरप्यग्रहणमात्विनेदेवान् नैतदेवांतयोः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि०वि २ श्रौतत्वेनवैतानिकसापेक्षत्वात् उक्तं हि याज्ञवल्क्येन कर्मस्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकालाहृते वापि
श्रौतं वैतानिकाग्निषु इति तस्यान्वैतानकल्पने उपस्थितपरित्यागेनानुपस्थितोपादानेन गौरवापत्तेः गार्हपत्यादिसंज्ञा तु
लौकिकस्याप्यन्वाधानसंस्कारादिभिः संभवंति शूलगववत् स्मार्ताधानेन तु पातित्येनानधिकारात् प्रायश्चित्तेन तत्कर्मानधिकारी
हि पतित उच्यते एतेन व्रात्यस्तोमादयोपि व्याख्याताः प्रकृतं इत्यादिरूपेणाधिकारिणा सम्यक् प्रथमकल्पतया कर्मकर्तव्यं
निःकामेनापि काम्यानामान्वितत्वमेव विशेषः आचारेमन्वाद्युक्तो वर्णधर्मादिः अध्यात्मवित्तम इति परलोकफलभागमेवेत्यात्मनि
दृढव्रतत्ववान् न्यायार्जितधनः स्वकृतिसंपादितकर्माङ्गधनः सुसंपूर्णफलमश्नुत इति तात्पर्यार्थः आपस्तंबः प्रयोजयिता
तु मंता कर्तेति स्वर्गनरकफलेषु भागिन इति यो भूय आरभते तत्र फलविशेष इति मनुः प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते राम
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलमिति प्रभुः समर्थः सांपरायिकं पारलौकिकं योगयाज्ञवल्क्यः विधिदृष्टं तु यत्कर्म करोत्य २७

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विधिनानुयः फलंनकिंचित्प्राप्नोति श्लोणमात्रंहितस्यनददिति छंदोगपरिशिष्टे अक्रियात्रिविधाप्रोक्ताविद्वद्भिःकर्मकारि
णां अक्रियाचपरोक्ताचतृतीयाचैयथाक्रिया स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंचयः कर्तुमिच्छतिदुर्मेधामोघंतस्यविचे
ष्टितं यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति परोक्ता परशाखोक्ता अयथा
क्रियेति विहितेतरविधानेन स्वशाखाविहिताविरुद्धपारक्यमितिग्राह्यमित्यर्थः तत्रदृष्टांतः अग्निहोत्रादिकर्मवदिति यथाग्नि
होत्रंयजुर्वेदप्रसिद्धंनसामविन्नत्रतदविरुद्धंयानत्सामगैरुपादीयते एवंसर्वकर्मसुत्रेयमविरुद्धंसर्वैःसर्वत्रोपादेयं यच्चस्व
शाखायामविहितं शाखांतरेचविहितं तच्चपरस्याविरुद्धं यथाघमर्षणसूक्तमाश्वलायनेषुपठ्यते बौधायनेषुच तत्रमाध्यंदि
नैर्बौधायनोक्तमुपादेयं अंतरंगत्वात् आश्वलायनीयस्यतुभेदः शाखाभेदस्त्रेतिबहिरंगत्वं बोधायनीयस्यतुशाखामात्रभेदए
वेति अंतरंगत्वं निरूपितमेतद्भगवतानेमिना सर्वशाखाप्रत्ययमेकंकर्मेति यथाग्निहोत्रादिरूपंकर्मनानाशाखास्वेकमेका

वे६२ ठ्य३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि॰वि॰ रंविहितं तथापि न कर्मान्तरं किंतु तदेव कर्माग्निहोत्रादि एकमेव सर्वकर्मप्रणवास्तु प्रतीयत इति अतोनुक्तप्रणयनायप्रणवान्त
२८ रुदुपादीयते कर्मैकेन सा जातस्यात् कर्म्मान्तरे विवेजात्याद्युपादानमन्याय्यमिति भावः एतच्च विहितातिरिक्तस्याने तदाहपरिशिष्टं व
कल्पं वास्वगृह्योक्तं यस्य यावत्प्रकीर्तितं तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेदिति प्रकृतमन्यथा कुर्याद्यदिमोहात्कथंचन
यतस्तदन्यथाभूतं तत एव समापयेत् समाप्ते यदि जानीयान्मयैतदन्यथा कृतं तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः इति तथा प्रधानस्या
क्रियायां च सांगं तन्त्रियते पुनः तदंगस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया प्रकृतं प्रारब्धं अन्यथा विपरीतं तत्त्व कर्मकरणे सत्येव कर्मा
द्यन्ते वसतियतः प्रत्यर्थारम्भं तत्कर्मान्यथाकरणं ज्ञातं तत एवारभ्य पुनर्यथोक्तमेव कुर्यात् एतत्कर्मासमाप्तौ समाप्ते तु कर्मणि तत्त
दन्यथा तत्स्थाने तावदेव पुनः कुर्यान्न सर्वकर्मावृत्तिः एतदंगान्यथाकरणे प्रधानान्यथाकरणे तु विशेषः प्रधानमकृतं चेत्तदा सां एम
गकरणं प्रधानस्य तन्त्रायं विशेषः सांनिपातिकान्यंगानि प्रधानेन सहावर्तन्ते नारादुपकारकाणि तेषामदृष्टोपकारकत्वात् २८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेषांयजमानसंस्कारद्वाराप्रधानसंबंधात् संनिपत्योपकारकाणांनुप्रधानशरीरनिर्वाहकत्वेनदृष्टार्थत्वात् यथाहविःसंस्का
रादियाज्यादिरूपाणामंगानितुयजति शरीरांतर्गतान्येव एवंसर्वेत्र अंगाकरणेतु आदिष्टमनादिष्टंवास्यात् तत्रारादुपकारकेषु
संनिपत्योपकारकाकरणेतुप्रधानशरीरानिष्पत्तेरावृत्तिरेवेतिवाच्यं क्रत्वर्थत्वात् आरादुपकारकाणांत्वदृष्टार्थत्वात्तदप
चारएवेतिनिरवद्यं सर्वकर्मस्वाचांतस्त्वाधिक्रियते वापुराणे क्रियांयःकुरुतेमोहादनाचम्यैवनास्तिकः भवंतिहिवृथा
तस्यक्रियाःसर्वानसंशयइति तथैमाहमनुः ब्राह्मेणविप्रस्तीर्थेनद्विजोनित्यमुपस्पृशेत् कायत्रैदशिकाभ्यांवानपित्र्येण
कदाचनेति हारीतः अंगुष्ठस्योत्तरतोरेखाब्राह्मंतीर्थंकनिष्ठिकायाःपश्चात्प्राजापत्यमग्रेंगुलीनांदैवमंगुष्ठप्रदेशिन्योरंतरा
पित्र्यंमध्यमाग्नेयं शैवः कायंकनीनिकामूलेतीर्थमुक्तंद्विजस्यतु अंगुष्ठमूलेतुतथाप्राजापत्यंचकीर्तितं कायंप्राजा
पत्यं कः प्रजापतिः तद्दैवतं सास्यदेवतेतिकरणे कस्येदिमत् इकारांतादेशश्चेति ततोरक्षायामादेशो मनुः अंगुष्ठम ६४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि॰ सिं॰
२८

त्स्यतलेब्राह्मं तीर्थं प्रचक्षते का॰ आयमंगुलिमूलेग्रे दैवं पित्र्यं तयोरधः इति अत्रे अंगुल्यग्रे याज्ञवल्क्यः कनिष्ठादेशिन्यंगुष्ठ
मूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् इति वसिष्ठः अंगुल्यग्रेषु मानुष्यं पाणिमध्ये तु आग्नेयं योग
याज्ञवल्क्यः मध्ये सौम्यं प्रतिष्ठितं मध्ये पाणिमध्ये बोधायनः अंगुलिमूले दैवमंगुल्यग्रमार्षमिति एवं च कनीनिकामूलस्य
तीर्थस्य प्राजापत्यकायदैवसंज्ञाः हस्तमध्यस्याग्नेयसौम्यब्राह्मतीर्थसंज्ञाः अंगुल्यग्रस्य दैवमानुषार्षसंज्ञाः तर्जन्यंगुष्ठम
ध्यस्य पितृतीर्थसंज्ञैवेति विनियोगमाह मार्कंडेयपुराणं मूलरेखामुक्तांगुष्ठमणिबंधेशुमध्यमं प्राजापत्यं महत्तीर्थं विप्रस्ते
नाचमेत्सदा धनायुर्हीनरेखासु सोमतीर्थं तु मध्यमं जलादिहवनं तेन कर्तव्यं यदनेन तथा वदनं हविर्निर्वापः हस्तमध्येव त
तीर्थे रत्निमाग्रहणाचनदिति हारीतः उपस्पर्शनं ब्राह्मेण आचमनहोमतर्पणानि प्राजापत्येन कुर्यान्मार्जनार्चनबलिकर्म एम
भोजनानि दैवेन पित्र्याणि आग्नेयेन प्रतिग्रहं स्त्रीपात् यज्ञैदैवेन प्राजापत्येन वाचमनमुक्तं नब्राह्मतीर्थावरोधे उक्तमनुपादेरध्ये

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैकवाक्यतोपपत्तेः छागलेयोपि हस्तमध्ये स्थलतीर्थे दक्षिणाग्रहणेनादिति भविष्यपुराणे कमण्डलूपस्पर्शनं दक्षिणाशन
मेवच सोमतीर्थेन राजेंद्र सदा कुर्याद्विचक्षण इति शाखायनः स्नानमाचमनं होमं भोजनं देवतार्चनं प्रौढपादो न कुर्वीत स्वाध्या
यं पितृतर्पणं आसनारूढपादस्तु जानुनोर्वा जंघयोस्तथा कृतावसक्थिको यश्च प्रौढपादः स उच्यत इति अवसक्थिनग्रीवतोन्यभा
वः जपहोमोपवासेषु धौतवस्त्रधरो भवेत् अलंकृतः शुचिर्मौनी श्रद्धावान्विजितेंद्रियः मौनी वृपालैकिकवादमस्तः वसिष्ठः
स्नातोधिकारी भवति दैवे पित्र्ये च कर्मणि पवित्राणां तथा जप्ये दाने च विधिचोदित इति पवित्राणि पावमानीप्रभृति पवित्रीकर
णानां मंत्राणां जपादिना विशेषणवैयर्थ्यापत्तेः अतो मंत्रमात्राभ्यासे अस्नातोप्यधिक्रियते प्रकारांतरेणापि निषिद्धादिनात्मशु
द्धिश्चेत् परं तु मैथुनसंबद्धवस्त्रधारिणस्तत्राप्यनधिकार एव वसित्वा मैथुनं वास इत्यनध्यायप्रकरणे वक्ष्यमाणत्वात् ओंकारप्रयो
गमाह मनुः ब्राह्मणः प्रणवं कुर्यादादावंते च सर्वदा स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यति इति अतो मंत्रावष्टंभकत्वोंकारप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

प्रयोगस्य जपकाल एवोपपत्तिः क्रमेप्रयोगे तु मंत्रांते कर्मादिः साकांक्षत्वाभिधानादिति मंत्रांत कर्मादि संनिपातेन तदसं
भवात् किंचापस्तंबः प्रणवमधिकृत्य यज्ञेषु चैतदादयः प्रसवाः प्रणवेनाध्यवनतावचनानि तस्मादोमित्युदाहृत्य यज्ञदानतपः
क्रियाः सततं प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां तथा त्रिमात्रस्तु प्रयोक्तव्यः कर्मारंभेषु सर्वशः तिस्रः सार्धास्तु कर्त
व्यमात्रास्तत्त्वार्थकोविदैरिति सार्धत्वं व्यंजनस्यार्धमात्रत्वात् देवताध्यानकाले तु द्रुतं कुर्यात्ससंशयः लोकेच भवति कर्म
सु चैतद्दीप्रवचनयान्निस्युर्यथा पुण्याहं स्वस्त्यृद्धिमिति भवति कर्मसु विवाहादिषु एतदादीनि ॐकारादीनि स्वस्त्यादिवचनानि
भवेयुः यमः पुण्याहवाचने दैवे ब्राह्मणस्य विधीयते एतदेवानिरोंकारं कुर्यात्तत्रियवैश्ययोरिति एवं सर्वत्रोंकारपूर्वकता
यां प्राप्तायां तत्रपवादमाह छंदोगपरिशिष्टं नोंकुर्यात्सोममंत्राणां प्रपगादिषु कुत्रचित् अतोऽपांचेर्विकल्पानां कालेनाचमनादि राम
नेति अघमर्षणः ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा एतेचयेमंत्राः पृथक्पृथक्प्रयुंक्ते विष्णुत्सुचांते न एवैक विनियोग विनि ३०

पुन्का अविकृष्टाउच्यंते यथाप्रजापतयेस्वाभिव्याहृतिभिरिति तत्रपति व्याहृतिप्रणवेप्राप्ते नोंकुर्यादित्यादि अविकृष्टा
नामेकुं वितियोग विनियुक्तानांनानामंत्राणामादौ नप्रणवंकुर्यात् होममंत्राणां ॐभूर्भुवःस्वःस्वाहेति किंहोममंत्रेष्वेयनि
यमः नान्यत्रापीत्याह अन्येषांच जप्यादिमंत्राणामपि यथाब्रह्मयज्ञ एकोध्यायोनुवाकोवापठेतेनत्राणवेकमेवोंकारंकु
र्यात् सर्वदेवेनउतनेत्याह कालेनाचमनादिनेति कालेनांतरेणंनरितो आचमनादिरूपक्रियांतरितोप्यनंतरएवप्रणवादौंउन नस ४
रेंकारोविद्ध्यादिति व्यासः आर्द्रवासास्तुयःकुर्याज्जपहोमप्रतिग्रहं सर्वंतद्राक्षसंविद्याद्बहिर्जानुचयत्कृतं एतत्संरक्तोदैवतं
न कामीत्यर्थः योगयाज्ञवल्क्यः परिधानाद्बहिःकक्षा निबद्धाह्यासुरीभवेत् धर्मेकर्मणिविद्वद्भिर्वर्ज्यातौ यावपत्नतः परिधाना
द्बहिः परिधानदेशाद्बहिर्निर्गतेतिलक्ष्मीधरः विष्णुपुराणे होमदेवार्चनाद्यासु क्रियासु चाचमनेतथा नैकवस्त्रःप्रवर्तेत द्विजमा वा
चनिकेजपइति शातातपः सव्यादंसात्परिभ्रष्टः कटिदेशधृतांबरः एकवस्त्रंतुतंविद्याद्दैवेपित्र्येविवर्जयेदिति उत्तरीयाभावेय

नि.सिं. नकेनचिद्विवस्त्रान्तासंपाद्या यथाहरेण: ब्रह्मचारिण एकं स्यात्स्नातस्य द्वे बहूनि वा तृतीयमुपवीतं स्याद्वस्त्राभावेन दुष्यत
३१ इति वस्त्रसंभवे न तत्परित्यागः बहिर्द्वितीयवस्त्रस्थाने तत्परिधीयते तथासति तन्मंत्रेण धारणं प्रसज्जेत तस्माद्बहुयज्ञोपवीत
धारणस्येतन्मात्रात्मकम् यदेकैकवस्त्रधारणमपि न कर्माधिकारविधानाय पत्तनु द्वितीयवस्त्रानुकल्पः कुतपयोगपट्टादयः त
त्र बहु बहु वस्त्रनाभयात्परित्यागोपि संभवति बौधायनः कात्यायवासाः कुरुते जपहोमप्रतिग्रहान् नतद्देवगमं भवति हव्य
कव्येषु यो हविरिति कात्यायमत्र रक्षोघ्नं वासो न नीलं च प्रशस्यते इत्यापस्तंबवचनात् तेलक्षे रक्तासननत्वंमध्ये
शुक्लादिर्द्धं न काषायं योगाभावात् तेन रक्तं रंगादि निषाधितिनिस्मरणाद्दशिकाषायमिति यभ्त्राच्प्रयोगः स ताद्दश्यात् काषा
योगर्द्धमस्य कर्णो विवितिवत् धारिका धाटोपि कर्कव्याख्यानमवसोक्ष संज्ञग्राह विकृतं वासो नाच्छादयीतेति पारस्करसूत्रस्य ना एम
च्छादयीत नीलादिरक्तं वासः कदाचनेत कषायनिषेधोत्र प्रशस्तं तद्दलाहृतमिति तथैव प्रसिद्धिरपि स्कंदपुराणे काशीखंडे ध्रुवव ३१

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रिते घृत्वो मुनीन्द्रदर्शेन्त्यधिकृत्य सात्वक्त्वकरणं किंचिद्विनिमीलितलोचनात् उधौतसद्मकाषायवासः प्रावरणाच्छि
तानेति नचैतेयतयः रहस्याहिते विकृतमात्रनिषेधे तुष्णीषादिविहितवस्त्रादेरपि निषेधापत्तेः तत्र व्याख्याने तु विकृ
र्दकृतं विकृतमिति विरुद्धं चकुलदेशसदाचारैः तेन सितवस्त्रधारणमपि कादयाहिशिरोमाहितयानिषिद्धमेव सदाचा
रादिविरोधात् गौतमोपि वाससी शाणक्षौमचीरकुतपाः सर्वेषां कार्पासं वाविकृतं काषायमप्येके ब्राह्मणस्य मांजिष्ठ
हारिद्रे इतरयोः शणमयं शाणं क्षुमाश्चतसी चीरं कुशादिनिष्पन्नं कुतपः पर्वतीयच्छागरोमनिर्मितं अविकृतमिति सर्वत्र
मपि संबध्यते रजकद्रव्यासंस्कृतमिति लक्ष्मीधरः काषायपक्षे रक्तकाषायरक्तमिति तस्यैव सम्मतं आश्वलायनोपि यदि
वाससी वसीरन्नक्तानि वसीरन्काषायं ब्राह्मणो मांजिष्ठं क्षत्रियो हारिद्रं वैश्य इति नचैतद्ब्रह्मचारिमात्रपरं सामान्येबाधका
भावात् नचस्नातकप्रकरणोक्तं मुक्तांबरधरो नीचकेशश्मश्रुनखःशुचिरिति याज्ञवल्क्यवचनं बाधकं मुक्तशब्दस्य नि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

मिन्नार्थत्वात् अत एव मनुः नजीर्णमलवद्वासा भवेच्च विभवे सतीति शुक्लवृत्तिरित्यादौ प्रयोगदर्शनात् इति सर्वमनवद्यं
वसिष्ठः शुक्लमहतं वासो ब्राह्मणस्य कार्पासं मांजिष्ठं क्षौमं क्षत्रियस्य पीतं कौशेयं वैश्यस्य सर्वेषां वा तांतवरक्तं तांतवं च
न रक्तं चेति धर्मधारयः रक्तं चोक्तद्रव्यैरेव तांतवमत्र कार्पासमेव कौशेयं कृमिकोशोत्थं शंखः क्षौमदुकूलसौत्राणि वा
सांति त्रयाणां वर्णानामिति अस्य मते सर्वाणि सर्वेषां यमः क्षौमकार्पासकुतपचर्मवल्कलकंबलाः सर्वे तु धारयेच्छु
क्लं वासस्तत्पारिधानिकं अत्रापि शुक्लं निर्मलमेव चर्मादौ तदसंभवात् पारिधानिकं परिधानयोग्यं मार्कंडेयपुराणे
सूर्योदयं विना नैव स्नानदानादिकाः क्रियाः अग्नेर्विहरणं चैव कुत्वभावम्लस्तेन सूर्योदयशब्देनाजहत्स्वार्थलक्षणा
याब्रेलमुहूर्तादिरात्रिप्रथमयामांतः कालः परिच्छिद्यते अनुदितहोमादौ सूर्यस्यासंभवात् अतो न रात्रौ स्नानदानादिकं एम
कार्यम् नैमित्तिकस्य तु ग्रहणपुत्रजन्मादेर्यावन्निमित्तमनुवर्तनेरनन्यगतिकत्वादनिषेध एव अस्पृश्यस्पर्शादेरप्रयत्नापाद् ३२

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुस्य पुरुषप्रयत्नापनेयस्यापि न निषेधः नाशुचिःस्नानमपि निष्ठेदिति वचनात् अनुकालाभिगमननिमित्तस्य तु गर्भे
णां किन्तु हेतुमन्निगदेन सूतकरूपं तन्निषेध एवान्यगामिकत्वात् न च प्रातःस्नानात्प्रसंगसिद्धिस्तुल्याधिकाराभवात् अतए
व नतेनैतस्यानुष्ठानं तत्र प्रकारमाह देवलः तूष्णीमेवावगाहेत यदस्यादशुचिर्नरः आचम्य प्रयतः पश्चात् स्नानं विधिवदाच
रेदिति परिशिष्टानित्यकाम्यमलकर्षणस्नाननिषेधः क्रियास्नानस्य क्रियानिषेधादेवासंभव एव अतएव न स्नानमाचरे
द्भुक्त्वा नातुरो न महानिशि न वासोभिः सहाजस्रं नाविज्ञाते जलाशये इति परिशिष्टोक्तमपि नस्नानमेव नाविज्ञाते जला
शये इति तु सर्वपरमेव दृष्टार्थत्वात् वासोभिः सहाजस्रमिति नस्नाविद्धिं अजस्रपदोपादानात् किंतु निर्मित्ते सति तथा
चैवस्याम: देवकार्याणि पूर्वाह्णे मनुष्याणां तु मध्यमे पितृणामपराह्णे च कार्याणीति विनिमयः छंदोगपरिशिष्टं तिष्ठं
नासीनाः प्रह्वो वा नियमो यत्र नेदृशः तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता यत्रोपदिश्यते कर्म कर्तुरंगं न तूच्यते ९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि.विं त्विग्गस्तत्र वितेय कर्मरणां पारगः परः यत्र दिङ्नियमो नस्यात् जपहोमादिकर्मसु निरुक्तास्तत्र दिशः प्रोक्ता ऐंद्री सौम्यापराजि
३२ ता ऐंद्री प्राची सौम्योदीचो अपराजिता ऐशानी अपराजितोक्ता दत्तलक्षं वर्धिनी यद्विवागमलोपः स्याद्दैवे पित्र्ये च कर्मणि
व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं कात्यायनोपि व्याहृत्यैव वैष्णवं मंत्रं जपेत् स्मृतिः स यदि गुणमानुपूर्वी वा चं व्याहरेत् तत्रो
वैष्णवीमृचं वा यजुर्वा जपेद्यत्तो वै विष्णुस्तज्जन्तं पुनरारभेत स्पोहे वा पापघ्नी रिति अयं भावः स्मार्ते वा श्रौतेपि निमित्तं ग्प ४
वैष्णवमंत्रो विष्णुस्मरणं वा वैकल्पिकं तत्र निमित्ततरतमभावेन लाघवगौरवे व्यवस्थाप्ये तत्र वैष्णवमंत्रो विष्णुगायत्र्येव
श्रौते प्राकरणिको मंत्र एव वैष्णवो ग्राह्यः तत्र यजुष्वे यजुरेव अश्वेदे ऋगेव द्वयोस्तु तौ तारतम्यमेव तत्र यमोपि स्वास्थ्य
तो वृतरणः पाणिं जुहुजोदिः प्रियं हरेत् संज्ञानस्य यमज्ञापुत्तस्मात्र व्याहरेद्विष्ण्विति तत्रैकः पुरुषार्थनिमित्तकः कर्म एम
कालेकृत्वर्थनियमान्यथात्वनिमित्तकः तत्रापि श्रौते कर्मणि प्रायश्चित्तसमुच्चयः अतएव नाहितेनानृते चैव नस्तेन ३२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्यान्नवार्धुषीति याज्ञवल्क्योक्तं प्रियं च नानृतं ब्रूयादिति मनूक्तं च स्मार्तम् तस्य पुरुषार्थस्यापि द्वादशपौर्णमासव्रत
प्रकरणे सर्वं सत्यमेव वदेदेतद्वै देवा व्रतं चरंति यत्सत्यमिति श्रौतं तदपचारे प्रायश्चित्तसमुच्चयेनापि प्रसंगः कर्मभेदात्
एवं श्रौतेपि सोमे दीक्षितस्य वाग्यमलोपश्रौतं वैष्णवजपरूपं आध्वरिकमपि कालाहुतिरूपं अथ यदि दीक्षितासु किंचिद्
पद्येत विश्वकर्मणे स्वाहेति जुहुयादिति एवं चतुस्त्रिंशत्कालाहुतयः चयनेग्निप्रायश्चित्ते च स्यात् तत्र श्रुतिः उभे प्रा
यश्चित्ती करोत्यध्वरप्रायश्चित्तिं चाग्निप्रायश्चित्तिं चाध्वरस्य पूर्णामथाग्नेरिति तत्र समिधाज्यस्योपहत्यासीन आहुतिं जुहोति
विश्वकर्मणे स्वाहेत्यथोपोत्थाय समिधमादधाति पुनस्त्वादित्या रुद्रा वसवः समिंधतामित्यृचा ततश्च पुरुषार्थेनृतवद
ने वैष्णवजपः सौमिकी कालाहुतिः समिदाधानाहुतिरूपं प्रायश्चित्तम् एवं द्वादशाहादौ कालाहुतिविशेषाः सविता प्रथमेहन्नि
त्यादिकाः दिङ्मात्रमेतत् कात्यायनः सदोपवीतिना भाव्यं सदा बद्धशिखेन तु विशिखो व्युपवीतश्च यत्करोति न तत्कृतमि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ति अत्रवाक्यद्वयं तयोरेकं पुरुषार्थबोधकमपरं क्रत्वर्थरूपार्थबोधकं तत्र प्राचीनावीतिनेत्यादिना क्रत्वर्थभूतेन पुरुषार्थो
बाध्यते विधिसंस्पर्शात् अर्थे तु विधिसंस्पर्शे निषेधो नार्थवान्भवेदिति न्यायात् तत्रापि श्रौतस्मार्तविरोधे श्रौतेन स्मार्त
बाधः यथा दीक्षितस्य स्नानादिनिषेधेन स्मार्तो बाध्यत एव न विकल्पादि बौधायनः उपासने गुरूणां वृद्धानामतिथीनां हो
मे जप्यकर्मणि भोजने आचमने स्वाध्याये च यज्ञोपवीती स्यादिति निगमपरिशिष्टे वामस्कंधे यज्ञोपवीतं दक्षे प्राचीना
वीतमितरथा पितृयज्ञे नाभ्यां द्विकंठासक्तमभिचारे निवीतमा पृष्ठदेशावलंबं ग्राम्यधर्मेषु इतरथा वामेतरस्कंधे द्वि
कंठावसक्तं लक्षणया कंठसमीपावस्थितयोः स्कंधयोर्ग्रहणं ग्राम्यधर्मेषु स्त्रीसंभोगेषु बौधायनः यज्ञोपवीतमानाभे
मेर्द्दक्षिणं वेहमवधाय शिरोवद्ध्यात् विपरीतं पितृभ्यः कंठावसक्तं निवीतमधोवसक्तमधोवीतं मनुबौधायनपैठीन एम
सयः अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् अपमार्गः सव्यांशे [illegible] ३४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञोपवीतीतोत्तरीयेनिधायदक्षिणंबाहुं बहिष्कृत्यसोपमध्यमभवेदितिगोरवंसूचितंभवति आपस्तंबः देवागारेतथा
भ्याद्रिगवांगोष्ठेतथाध्वरे भोजनेस्ववनेदानेसंध्ययोःसाधुसंगमे अग्न्यगारेविवाहेस्वाध्यायेभोजनेतथा उद्धरेद्दक्षिणं
पाणिंब्राह्मणानांक्रियासुच योगयाज्ञवल्क्यः आर्षंछंदश्चदैवत्यंविनियोगस्तथैवच वेदितव्यंप्रयत्नेनब्राह्मणेनविशे
षतः अविदित्वातुयःकुर्याद्याजनाध्यापनंजपं होममंतर्जलादीनितस्यतच्चाफलंभवेदिति अंतर्जलादीनि अंतर्ज
लेक्रियमाणानि अघमर्षणादीनि तथा यज्ञजातानामितत्वेन आर्षछंदश्चदैवतं विनियोगंब्राह्मणंचमंत्रार्थज्ञानक
र्मंच तानेकर्मतानतरूपाक्रिया अनुष्ठेयार्थस्मरणं प्रयोजनमितियावत् एकैकस्यऋषेःसोपिचंद्रोपनिषिषिवद्भवेत् दे
वतायाश्चसायुज्यंगच्छत्यचनसंशयः सायुज्यंसहयोगित्वं प्रवेशकप्रकारेण अध्यादीन्वेत्तियोद्विजः अधिकारोभवेत्तस्य
रहस्यादिषुकर्मसु रहस्यादिषुगोप्यजप्यादिषु येनयदृषिणादृष्टं सिद्धिःप्राप्ताचयेनवै मंत्रेणतस्यतस्योक्तंऋषेर्भावस्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰ विं॰ पार्थिवं छादनाच्छंद उद्दिष्टं वाससी इव वाकृतेः आत्मा संछादितो देवैर्मृत्योर्भीतैस्तु वै पुरा आदित्यैर्वसुभिः रुद्रैस्तेन छंदां
३५ सितानि वै आकृतेः शरीरस्थानस्य यस्य तु मंत्रस्य उद्दिष्टा देवता तु या तदाकारं भवेत्तस्य देवत्वं देवतोच्यते यद्यन्मंत्रस्य याया
देवतोच्यते पराकारेण इंद्रशक्रादिरूपेणोद्दिष्टा प्राधान्येन प्रतिपादिता तदाकारमेव देवतात्वं न स्वरूपाकारेण पुरा कल्प
समुत्पन्ना मंत्रकर्मार्थमेव च अनेनेदं तु कर्तव्यं विनियोगः स उच्यते नित्यकं यत्र मंत्रस्य विनियोगः स उच्यते प्रयोजनं प्रतिष्ठा
नं स्तुतिमंत्रे ब्राह्मणं तदिहोच्यते प्रतिष्ठानमात्मपः समापनं परिधापनमुच्यते एवं पंचविधं योगं जपकालेष्वनुस्मरेत्
होमं मंत्रजेले योगे स्वाध्याये याजने तथा योगाच्च भ्यादिसंबंधः योगे श्रवणादौ योगांग जपादौ वा कात्यायनः वृषीमयंस
पैमभिधास्यत्पार माध्यंदिनीये वाजसनेयके यजुर्वेदाम्नाये सर्वे सखिले सशुक्रिय ऋषिदैवतछंदांस्यनुक्रमिष्यामो यजुषा राम
मनियतात्तरत्वादेतेषां छंदो न विद्यते प्यार अथपः स्मार्तारः परमेष्ठ्यादयो देवता मंत्राणां तद्भक्तास्यादिका हविर्भाजः स्तुतिभाजो ३५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वान्: शंनोवाश्वाः श्मेयपवेषकपालेध्योन्वःखलाद्यमत्रप्रतिमाभूतामन्त्रुदाधं सिगायत्र्यादीन्येतान्यविदित्वा योधीते नुब्रूते जपति
जुहोति यजते याजयति तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यपविज्ञायैतानि योधीते तस्य वीर्यवत् अथ योर्थवित्तस्य वीर्यवत्तरं भवति जप्त्वा
हुत्वेष्ट्वा तत्फलेन युज्यत इति यत्र न मंत्रलिंगं न देवताप्रकाशकं तत्र विनियोगाद्देवदेवताज्ञानं यथा केनेन्द्र एव त्रिस्तनुकृत् गायत्री
तस्या आग्निकार्ये विनियोगादग्निर्देवतोच्यते तस्या एव ग्रहयोगे विनियोगात्केतुर्देवतेति क्वचित्स्वरूपेणापि देवताज्ञानं यथा हृषि
गलसूत्रं असूस्तोऽस्तु इति देवता इति गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यास्त्वाग्रहस्पतिः पञ्चावरुणाः त्रिष्टुभ इंद्रः जगत्या
विश्वेदेवाः क्वचिद्देवताप्रकाशकलिंगसद्भावे नारभ्याधीतमंत्राणां देवतानत्स्वरूपेणानमिति तेषामनारभ्याधीतत्वेन विनियोज
काद्यभावात् तेषां कचिल्लिंगेन विनियोगात् न च वचनस्याभावात् न च तु गायत्र्यां स्थानान्यामग्निर्देवता प्रत्येतव्यः पाविषिं गा
छंदोलापने यथाहपिंगलः गायत्र्यादि सप्तछंदांस्यभिधाय आग्निवेश्यकाश्यपगौतमांगिरसभार्गवकौशिकवासिष्ठानि गो

श्री

जगतीनां छन्दसामग्न्यादयो देवता अनादेशे गायत्र्या अग्निः उष्णिहः सविता अनुष्टुभः सोमः बृह

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि॰चि॰ त्राणि अयंभावः एषां छंदसामेतानि गोत्राणि तत्रैतन्नियोजनं छंदोतानेष्वादितानेछंदस्येव आर्षं प्रतीयात् अथितानेछंद
३६ सोप्युक्तानेपि ऋषेरेव छंदः प्रतीयात् कात्यायनोपि सर्वानुक्रमणीये अपि मित्रपलक्षितं वाक्यमृषयश्छंदो मित्रपलक्षिता देवता मं
त्रवर्णाध्ययजुषयोर्विनियोगतन्त्रविवृत्तेया इति तन्त्रयोगः स्वस्वशाखानुक्रमणानुसारेण कार्यः दिङ्मात्रमेतत् बौधायनः कर्मयुक्तो
नाभेरधः स्पर्शं विवर्जयेत् योगयाज्ञवल्क्यः रौद्रपित्र्यासुरान्मंत्रांस्तथा चैवाभिचारिकान् व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यत आचरेत्
कात्यायनः रौद्रराक्षसमासुरमाभिचारिकं मंत्रमुक्त्वाप्यात्मानं वालभ्योपस्पृशेदप इति नरेतत्कर्मणो प्युपलक्षणमपौतिकौ
चार्याः अतएव चातुर्मास्येष्वैवकं कर्माभिधाय क्तिर्ज्ञिहंस्पृष्टमाचर पुनरेव्यापउपस्पृशेन्निरुद्ध्येण्वेवं वारत्नचारिण्मुः शां
तिरापस्तु एकादशिः शांसमयइतिश्रुतेः छंदोगपरिशिष्टे पितृमंत्रायणे द्रवणे आत्मालंभे मन्येवेत्तणे अधोवायुसमुत्सर्गे प्रहासेनृतभाषे रम
णे मार्जारमूषिकास्पर्शे आक्रुष्टे क्रोधसंभवे निमित्तेष्वेषु सर्वेत्र कर्मकुर्वन्नुपस्पृशेदिति पितृमंत्रानुद्रवणे पितृदेवतमंत्रोच्चारणे ३६

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मालंभे हस्त्यालंभे अवेक्षणे हस्तपसे च केचिदधवेक्षणे पठंति केचिद्घर्षणे अधमेक्षणे इति वा पाठः तस्य स्नेम
ज्ञावेक्षणे आकुष्ठपक्षमाषणे योगपातवत्वाः अस्नानादि दिवा मोहात्म्यथवनाध्धेर सुपत् स्मरणादेव तद्दि संभोः संपूर्णस्या
दितिश्रुतिः मोहाद्विपर्ययतानात् न कुर्यात्कस्यचित्सीडं कर्मणामन्तसागिरे आचनत्रभिषेकं तु कर्मस्वपस्यानि नाचरेत् अभिषेकं
स्नानं अंगिराः संध्ययोरुभयोर्जप्यभोजनदंतधावने पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः गुरूणां सन्निधौ दाने यागे चैव वि
शेषतः एषु मौनं समास्थितः स्वर्गं प्राप्नोति मानव इति मौनमत्र रथ्यालापाभावः याज्ञवल्क्ये दानं प्रतिग्रहो होमो भोजनं बलिरेव
च सांगुष्ठेन सदा कार्य्यमसुरेभ्यो न्यथा भवेत् सांगुष्ठेन अंगुष्ठसहितेन पाणिना अन्यथैतानि असुरेभ्यो भवंति छंदोगप
रिशिष्टे हरिता याज्ञियादर्भाः पीतकाः पाकयज्ञियाः समूलाः पितृदेवत्याः कल्माषा वैश्वदेविकाः इत्वाः प्रवरणीयाः सुः
कुशा दीर्घंस्त्र वर्हिष इति दर्भाः पवित्रमित्युक्तमतः संध्यादिकर्मणि सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः इत्या

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

त्रि०चि. ३८ इतिकुशपरिमाणंवक्ष्यति गोकर्णमात्राः कुशाः शस्ताः पवित्रे प्रादेशमात्रे रत्निमात्राः समूलाः पितृदेवत्या इति तेषु गोक
र्णपरिमाणाद्योह्रस्वास्ते कुशाः प्रचरणीया भवंति प्रचरणं कर्मप्रचारः तद्देशाः मार्जनोपग्रहादियोग्या इत्यर्थः दीर्घा
स्तु ततो रत्न्यरत्निहस्तमात्रास्ते बर्हिषो भवंति बर्हिः साध्यकर्मसाधनानि भवंति परिस्तरणास्तृणोपाकरणविधृतिप्रस्त
रवेदिसंस्तरणादिकर्मसाधनानि भवंतीत्यर्थः हरितायाज्ञियादर्भा इत्युत्सर्गः पीतकाः पाकयज्ञिया इति तदपवादः ये
समूलास्ते पितृदेवत्या इति श्राद्धादिपितृकर्मसाधनानि स्युः वर्णेन तु ते हरिता एव हरितायज्ञिया इति यज्ञियत्वेनोत्स
र्गैकत्वात् पाकयज्ञियास्त्वोपासनस्य धृस्येव कर्मणोंगं कल्माषा वैश्वदेविका इति कर्बुरवर्णाः वैश्वदेविकाः श्राद्धांतर्ग
तवैश्वदेवकर्मांगं भवंति न पंचमहायज्ञांगं तस्य च पाकयज्ञत्वाभावात् दर्भाः पवित्रमित्युक्तमिति दर्भाः स्वयंपूता अन्यस्या राम
पि पावनत्वमा इति यतः अतो हेतोः संध्यादिकर्मणि तेन त्वमाने सपाणिः सोपग्रहः कार्यः उपग्रहं तत्र इत्युपग्रहाः कुशाः ३८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्सहितैःसव्यपाणिःकार्य्यैःदक्षिणःसपवित्रकः पवित्रत्वविशिष्टकुशयुक्तःकार्य्यइतिभावः पवित्रलक्षणंचतत्रैव
अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचिदिति अंतर्गर्भोस्यास्तीत्यंतर्गर्भि नान्तर्गर्भम्
अनंतर्गर्भि गर्भोत्रप्रसूनं [नपत्रमात्रं] तस्यसत्त्वेनतत्त्वेनानुपादेयत्वापातात् नद्याद्यागर्भितादर्भोइतितत्रैवनिषेधात् गर्भोजातएवा
मितीस्वेनारकादेराकृतिगणत्वात् अनंतर्गर्भिणमित्यत्रसत्त्वेच्छेदं गर्हितवद्वा साग्रं कौशमिति दर्भमात्रेकाशादौ
तत्पवित्रंनास्यादितिनियमः अनेनस्यादाचमनेशुद्धिहृनास्यात् कौशस्यैवनस्यात् नियमात् पवित्रस्यतुनाशेच
मार्जनेनुकल्पवचन पितॄणांतर्पणेस्यात्तुस्वारेपूजनेनथेति वचनात् द्विदलं दलविभागइतिधातोःपचाद्यचिदलमिति
अतोभागद्वयवत्पवित्रंस्यात् प्रादेशमात्रंचस्यात् तच्चछेदनेनप्रादेशमात्रत्वंसंपाद्यं सर्वप्रकृतिभ्रूतयोर्णमासेतथाहस्व
त्वात् तथाचकात्यायनः कुशौसमावप्रशीर्णाग्रावनंतर्गर्भिणौकुशौच्छिनत्तिपवित्रेस्थइति सर्वत्रमंत्रसंबंधेप्राप्ते वि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि०चिं. शेषमाह देवीपुराणे कुशैः समावृतो यो यावन्न गर्भिणो नथा कुशैश्छिन्नतियन्मौनी पवित्रकरणं हि तत् स चायमुपग्रहो न्या
३८ यसिद्ध एव एकत्र द्रव्ये साज्ये वेदोपग्रहणस्पष्टता नान्यत्रेति कात्यायनपरिभाषणात् यत्रैकद्रव्यविषयिकं कर्म क्रियते यथा
होमादि तत्र साज्ये कर्मणि वेदोपग्रहो मादि तत्र साज्ये कर्मणि वेदोपग्रहो भवेत् अन्यत्रास्पष्टा न यस्मिन् कर्मणि वेदस्यो
नत्वं त्रैकुशो वयहः अत एव स्मार्ते उपमेयं न कुशा उपग्रहांते स चायमुपग्रहः कृत्वर्थः पूर्वोक्त उपग्रहार्थो न वाध्यवाधकभा
वः अतः समुच्चयः छंदोगपरिशिष्टे पवित्रलक्षणमभिधायाह एतदेव हि पिंजल्या लक्षणं समुदाहृतं आज्यस्योत्प
वनार्थाय तदप्येतावदेव तु विनि तथा एतत्प्रमाणमेवैके कौशीमेवाहुर्मंजरीं कौशीं वा शीर्णकुसुमां पिंजूली पवित्र त
ते गृह्यपरिशिष्टे दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा हविरग्नयः अयातयामान्येतानि नियोज्यानि पुनः पुनरिति किमयं राम
मयातयामत्वं कर्मान्तरे ऽपीति केचित् विशेषनिषेधात् नत्वैव येत्वपि रणास्त्रिनादर्भा ये: कृते पित्र्य तर्पणं ध्यतेःह ३८

त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेच विशम्रत्रे त्यागस्तेषां विधीयत इति अपरेत्वाहुः एतद्धादृपदामावास्यासंगृहीतकुशपरं यथाहमरीचिः मासेन
भस्यमावास्यानस्यां दर्भोच्चयो मतः अयातयामास्ते तेषां नियोगाःस्युःपुनःपुनरिति उक्तहेतोरेव अत्रापि निषेधमाह ल
घुहारीतः चितौ दर्भाः पथि दर्भाः ये दर्भाः यज्ञभूमिषु स्तरणासनपिंडेषु षट्कुशान्परिवर्जयेत् पिंडार्थं ये कृता दर्भा यैः
यैःकृतं पितृतर्पणं मूत्रोच्छिष्टे धृता ये च तेषां त्यागो विधीयते नीवीमध्ये तु ये दर्भा ब्रह्मसूत्रे च ये कृताः पवित्रांस्तान्वि
जानीयाद्यथाकायस्तथाकुशाः इति नभोमावास्यासंगृहीता कुशा अपि चित्यादिदेशसंभवास्वरूपदुष्टाः स्तरणासनपिं
डेषु विनियुक्ताश्चानेककर्मान्तरविनियोगार्हा वचनात् एवं पिंडार्थं ये कृतास्ते विनियोगाभावेपि न कर्मान्तरे विनियोज्याः यैश्च
पितृतर्पणं कृतं तेपि न कर्मान्तरे विनियोज्याः मूत्रोत्सर्गादिक्रियां कुर्वाणेन उच्छिष्टेन च ये धृतास्तेषामपि त्याग एव कर्मान्तरे न
त्वापि नीवीमध्ये ये धृताः ब्रह्मसूत्रे यज्ञोपवीते च ये धृतास्ते पवित्रा एवेति अत्र दृष्टान्तः यथा कायः शिरःप्रभृति मूत्रो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

नि०वि० ष्ठारादिसमकाले अस्पृष्टस्पृष्टत्वेन तत्स्पृष्टान्नस्य शुद्धिः शुद्धोनस्पृष्टः एवं कुशा अपि नीवारादिस्थाने विहिता अस्पृष्टाश्चेत्तेपि कृतान्न
३९ शुद्धेः शुद्धा एव स्पृष्टास्तेपि परित्याज्या एवेति योजयंति तदेतन्न विहितत्वेनात्र स्मरणात् पुनरेकवाक्योपात्ता कुशाः कृष्णाजिन
मेवं ब्राह्मणः हविरग्नौ नातिशीघ्रान्निर्वाहः संगच्छते नहि कृष्णाजिनमेकदीक्षितसंस्कारकमन्यसंस्कर्तुमलं प्रयोगस्य सम
त्वात् अतएव च वस्मासः एवं मंत्रा आग्नेयाः सोमं तर्पयितुमीशते लिंगविरोधात् ब्राह्मणा अपिहि विधि तिपायरता
सोमं कारयितुमधिकारिणः हविरपि नाग्नेयमग्निष्टोमीयपाके विनियोज्यं उद्दिष्टत्वात् अग्नयोप्येककर्मार्थमन्वा
हिता अस्ते च निर्दिष्टतत्कर्मणो न यागांतरे प्रयोगभावं भजंते कृतार्थत्वात्तेषां सभ्यगार्हपत्यावसथ्याः पुरुषार्थाः पुरुषानु
बंधित्वात् वस्तायिनो न पुरुषायतरं संस्कुर्वंति ब्राह्मणोग्नीनादधीत आत्मनेपदेनाधातुरेवोपकारकत्वपर्यवसानात् राम
तदेतेषां चोष्णावस्थाने नोष्णरोषोपपत्तौ प्रज्ञायां गतिं ब्रूमः एतेषां च दर्भादिवस्तुपातमन्वकथनमसमापितप्रयोग ३९

हादिनावाचकत्वं

णामंतरापत्तितन्नैमित्तिकार्थे यथापौर्णमासेष्ट्यां तायामानायां कपालनाशनिमित्तमाग्निनेष्ट्यां पतितायां दर्भोद
पः परिग्रहीतानामेवांगभावं भजंते न पुनरन्ये संपाद्याः कृष्णाजिनमप्यनिष्ट्यत्वप्रयोजनं चेन देवनैमित्तिकहविःसंस्कारकं भ
वति न पुनरध्यासादनप्रोक्षणसंस्कारमपेक्षते यथा निरूढपशावन्तरा पुरोडाशनिर्वापेप्राप्ते सांनिपातिकान्येवांगानि
भवंति तदेतन्मात्राणामुपलक्षणार्थं अतः स्रुक्स्रुवादिकमत्र पूर्वोक्तमेव न पात्रांतरापेक्षा मेत्रा अपि प्रकृतिविकृतिषु
युक्ता एवोपक्रम्य हादिना वाचकत्वं संपाद्य विनियोज्याः न सन्त्येषु नाममेत्रादिपरिकल्पनं कुर्यात् श्रालस्ता ऋत्वि
जः तेपि प्रनाएव नियोज्याः नान्ये वरणीयाः हविस्तानिर्दिष्टमाज्यं निर्दिष्टस्यान्यसंबंधानौचित्यात् अत एवाग्न्याने मि
त्तिकपुरोडाशादिसंस्कारः संपादनान्यांतरमुपदेयं अत एवाग्निहोत्रहोमेषु जुहुयात् सर्वस्कंदने स्कंतियाह न जुहुयस्मा
ग्निहोत्रं प्रजुहुयात् स्कंदे किं तत्कर्मका प्रायश्चित्तिरिति स्कन्नप्रायश्चित्तेनाभिमर्शनादिरूपनिमित्तपरिशिष्टेन जुहुयाद्

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि. वि. पुनीवीस्तु कस्माघदित्याभिधेनस्कंत्रमायश्चित्तेनैवाभिमृश्याद्भिरुपनिनीयपत्स्यात्स्यांपरिशिनष्टि ध्रुवस्यानेनजुहुयादित्युपत्र
५० स्यतद्वैकउपल्कंतेहुतोच्छिष्टंवाएतद्यामैयामस्याएतन्नेनस्पहेतव्यमित्याशंकानंतरं तदुतत्राद्रियेतयद्दैवाएतस्यातयामायेन
हविरातंचनंकुर्वेतेतस्मायत्स्यत्स्यांपरिशिनष्टि तदस्मा उत्तीयाहरेयुर्येनुतत्रतस्मायदस्यच्छिद्रेततदग्नावधिश्रित्यावज्योत्पा
यःप्रत्यानीयोद्वास्यतरहोहैवोत्त्रेष्यामीत्युक्तंभवमत्पात्रपयोत्नीतमेवास्मा उत्तीयाहरेयुस्तेनकामंजुहुयादिति अनिष्प
त्रप्रयोजनस्यहविषःअयातयामत्वंप्रत्याययति अपूर्वस्योपादानेतुसंस्कारंदर्शयति अग्नयोविहृताएवनैमित्तिकस्यांगं
भवंतिनान्येविहरणीयाःउक्तंचपरिभाषायां प्रतिकर्मोद्धरणमप्रसंगेप्रवृत्तकर्मात्लौकिकोपसंयोगादिति अतोयानि
नैमित्तिकानिप्रधानप्रयोगएवान्वीनिकपालनाशनिमित्तकानितानिपूर्वोपात्तैरेवकुशादिभिरनिष्पन्नप्रयोजनैःसंपा एम
द्यानि यानितुगेहदाहपुत्रजन्मादिनिमित्तकानि तेषांपूर्वोपक्रांतप्रयोगाभावात्स्वतंत्रैरेवदर्भकुशमाजिनादिभिर्गाह्यैरग्नि ५०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवमाहवैराग्यकृत्वा मात्रजानानिवृत्तेमेनदुर्दाहन्तं शिवं संपूजयित्वा यो जागर्ति च चतुर्दशी । मातुः पयोधररसं न पिबे
त्सीकदाचन । यदीच्छास्वतान्भोगान्दिवि देवसमोदमान् । आगमोक्तविधिं कृत्वा प्राप्नोति सकलं फलं । आदौ मार्गशीरे मासि
दीपोत्सवदिनेपि वा । गृहीयान्माघमासे वा द्वादशैवमुपोषयेत् । निशि जागरणं कृत्वा दीपो घोषिनद्[illegible]ः गीतवाद्यविनोदेन
पूजाजाप्यैः शिवेरितः । एवं द्वादशवर्षेषु द्वादशैव तपोधनान् । आचार्यः शिवशास्त्रज्ञो[illegible] विशेषतः । आमंत्र्य परयाभ
क्त्या गृहं गत्वा तपोधनान् । आचार्यः शिवशास्त्रज्ञो भक्तियुक्तं च गृहीत्वा चरणद्वयं । आगच्छ मे गृहं त्वं वह[illegible]कृत्वा गृहं कुरु स्वा
मे अनि[illegible]शिनानेवं भ्रमाते विमले पुनः । गृहीत्वा भयलिंगं तु स्थावरं जंगमं पुनः । घृतेनाभ्यज्य यत्नेन सुगंधैर्मृत्तिकादिभिः । पंचा
मृतेन स्नपयेन स्नाप्य वो दत्ते नादिभिः । स्नापयेद्वा विकुंभानां सहस्रेण शतेन वा पंचाशतेन । एतान दर्शनेस्नापयेच्छीतलेन वा चैव
नेन विलिप्याव स्थावरं जंगमं तथा । एतत्पंचजीवि[illegible]पुष्पैश्च [illegible] दीपादि[illegible] सघंनेन तथा । नैवेद्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नि॰विं॰ विमस्तां ग्रन्तीरखंडसमन्विनानागुडादिलड्डुकांश्चैव अन्नं च तृचिरं वहु। निवेद्य येस्तानि गुरुरेवनयस्विनां। देवायैतुगुरुं पूज्य कृत्वा मंड
लके शुभे। सुसत्माणि वस्त्राणि याग्यां सोपस्करमपि। वादशौवत्तुगारखान्वरिधानादिकं न या। गंधादिविविधैः सर्वानन्यांस्तत्र सम
गतान्। दक्षिणाभिश्च कुंभैश्च अन्नैश्चैवप्रपूजयेत्। अथवा दक्षिणामेव दद्याच्छक्त्यानिलानां। दत्वा भुंजापयेत्तावीन्गुरुं चैवनपश्चि
नं। पश्चात्समापयेद्देवं शीघ्रं नामेमहेश्वरः। सर्वांश्चैवनयाचार्यः शिवव्रतपरायणः। नस्मान्तापोपि न भवेद्दुर्भिक्षोदिपातैरपि। अथानं
कालय ---- इदंपातिस्वयंभुवं। सद्विजो लोकपालेश्च विमानैः सार्वकामिकैः। ननं यक्षेशनमतां देवं नारायणं गणेशं च नैः इन्द्रायाः स्तोत्रि
सदेवेशः। शिवं त्रिभुवनेश्वरं। नमस्तुभ्यं जगन्नाथ चललाटे चंद्रशेखर। नमस्तेऽभयायुक्त भुक्तिमुक्तिप्रदायक। नमस्ते कामदहने चैलो
क्यव्यापिने नमः। नमस्ते ···· कालभीतोस्मि शंकर। भैरवडावानुशोहं नवमकस्यपाणि वरात्रिमुपोषणात्। सोहं ददामि वेतुभ्यं ८१
देवदानवडूले मे। एताकन्यामहाभाग। दिव्येनेत्राणि तुभ्यं जाः। रूपयोवनसंपन्ना पीनोन्नतपयोधराः। सर्वलक्षणसंपन्ना कुंडलैर्ये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection